इत्याह— परिणाममेवेत्यादि । खलु स्फुटम् । तस्मात् परिणामात्, अथवा यतः एवं तस्मात् । पापापचयः पापस्य अपचयः अनुपार्जनं निर्जरा च । पुण्योपचयः पुण्योपार्जनं पुण्याभिवृद्धिश्च । सुविधेयः सुखेन विधातुं शक्यः सुष्ठु वा कर्तव्यः ॥ २३ ॥ ये तु धर्मोपचयम् अकुर्वन्तः विषयसुखान्यनुभवन्ति तेषां निन्दां दर्शयन्नाह— कृत्वा धर्मविघातमित्यादि ॥ २४ ॥

पापकी निर्जरा, नवीन पापका निरोध और पुण्यका उपार्जन करना चाहिये ॥ विशेषार्थ— 'शुभः पुण्यस्याशुभः पापस्य' (तत्त्वा. ६–३) इस सूत्रमें आचार्यप्रवर श्री उमास्वामीने यह बतलाया है कि शुभ योग पुण्य तथा अशुभ योग पापके आस्रवका कारण है। यहां शुभ परिणामसे उत्पन्न मन, वचन एवं कायकी प्रवृत्तिको शुभ योग तथा अशुभ परिणामसे उत्पन्न मन, वचन एवं कायकी प्रवृत्तिको अशुभ योग समझना चाहिये। इस प्रकार जब पुण्यका कारण अपना ही शुभ परिणाम तथा पापका कारण भी अपना ही अशुभ परिणाम ठहरता है तब आत्महितकी अभिलाषा करनेवाले भव्य जीवोंको अपने परिणाम सदा निर्मल रखने चाहिये, जिससे कि उनके पुण्यका संचय और पूर्वसंचित पापका विनाश होता रहे ।।२३।। जो प्राणी अज्ञानतासे धर्मको नष्ट करके विषयसुखोंका अनुभव करते हैं वे पापी वृक्षोंको जड़से उखाड़कर फलोंको ग्रहण करना चाहते हैं ।। विशेषार्थ— जिस प्रकार उत्तम फलोंको चाहनेवाला मनुष्य उन फलोंको उत्पन्न करनेवाले वृक्षोंको जड़-मूलसे उखाड़कर कभी उन अभीष्ट फलोंको नहीं प्राप्त कर सकता है उसी प्रकार विषयसुखकी अभिलाषा करनेवाले प्राणी भी उस सुखके कारणभूत धर्मको नष्ट करके कभी उक्त विषय-सुखको नहीं प्राप्त कर सकते हैं । इसलिये यदि विषयसुखकी अभिलाषा है तो उसके कारणभूत धर्मका रक्षण अवश्य करना चाहिये ।।२४।। जो धर्म

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्तृत्वहेतुकर्तृत्वानुमतैः स्मरणचरणवचनेषु ।
यः सर्वथाभिगम्यः स कथं धर्मो न संग्राह्यः ॥ २५ ॥

धर्मो वसेन्मनसि यावदलं स ताव-
द्धन्ता न हन्तुरपि पश्य गतेऽथ तस्मिन् ।
दृष्टा परस्परहतिर्जनकात्मजानां
रक्षा ततोऽस्य जगतः खलु धर्म एव ॥ २६ ॥

ननु तिरस्कारमात्रमेवेदं तत्सुखानुभवने धर्मोपार्जनस्य कर्तुं सर्वथाप्यशक्यत्वादित्याशङ्क्याह— कर्तृत्वेत्यादि। धर्मविषये हि यत्स्मरणं तथा चरणम् अनुष्ठानं प्रतिपादनं तद्विषयाणि यस्य यानि (?) प्रत्येकं कर्तृत्वहेतुकर्तृत्वानुमतानि तैः। सर्वथा योऽभिगम्यः प्राप्यः मनाक् अगम्यो न भवति ॥ २५ ॥ एवंविधे धर्मे प्राणिनां चित्ते वर्तमानेऽवर्तमाने च फलमुपदर्शयन्नाह— धर्मो वसेदित्यादि। जनकात्मजानां पितृपुत्राणाम् ॥ २६ ॥

मनसे स्मरण, शरीरके द्वारा आचरण तथा वचनकृत उपदेशको विषय करनेवाले कर्तृत्व (कृत), हेतुकर्तृत्व (प्रेरणा—कारित) और अनुमोदनके द्वारा सब प्रकारसे प्राप्त किया जा सकता है उस धर्मका संग्रह कैसे नहीं करना चाहिये? अर्थात् सब प्रकारसे उसका संग्रह अवश्य करना चाहिये ॥ विशेषार्थ— जो भी शुभ अथवा अशुभ कार्य स्वयं किया जाता है वह कृत, जो दूसरोंके द्वारा प्रेरणापूर्वक कराया जाता है वह कारित, तथा दूसरोंके द्वारा किये जानेपर जिसकी स्वयं प्रशंसा की जाती है वह अनुमत कहा जाता है। ये तीनों ही मन, वचन और कायसे सम्बन्ध रखते हैं। यथा— मनकृत, मनकारित, मनानुमत, वचनकृत, वचनकारित, वचनानुमत, कायकृत, कायकारित और कायानुमत। इस तरह चूंकि इन नौ प्रकारोंसे सुखप्रद धर्मका संग्रह भले प्रकार किया जा सकता है अतएव सुखाभिलाषी प्राणियोंको उक्त प्रकारसे उस धर्मका संग्रह करना चाहिये, यही उपदेश यहां दिया गया है ॥ २५ ॥ देखो, जब तक वह धर्म मनमें अतिशय निवास करता है तब तक प्राणी अपने मारनेवालेका भी घात नहीं करता है। और जब वह धर्म मनमेंसे निकल जाता है तब पिता और पुत्रका भी परस्परमें घात देखा जाता है। इसलिये इस विश्वकी रक्षा उस धर्मके रहनेपर ही हो सकती है ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न सुखानुभवात् पापं पापं तद्धेतुघातकारम्भात् ।
नाजीर्णं मिष्टान्नान्ननु तन्मात्राद्यतिक्रमणात् ॥ २७ ॥

ननु विषयसुखमनुभवतां प्राणिनां पापोपार्जनसंभवात्कथं धर्मः स्यात् इत्याशङ्क्य आह— न सुखानुभवादित्यादि । तद्धेतुघातकारम्भात् तस्य धर्मस्य हेतवोऽहिंसादयस्तेषां घातकस्य विनाशकस्य जीववधादेरारम्भात् हिंसाद्यावेशकरणात् । तन्मात्राद्यतिक्रमणात् तस्य भोजनस्य मात्राद्यतिक्रमोऽतिमात्रस्य वेलातिक्रमयुक्तस्य प्रकृत्यवस्थाविरुद्धस्य चाहारस्य ग्रहणं तस्मात् । नो चेन्नित्यभोजनमात्रादधिकात् ॥ २७ ॥ ननु हिंसादिकर्मणः

विशेषार्थ— धर्मका स्वरूप दया है । वह धर्म जिसके हृदयमें स्थित रहता है वह दूसरोंकी तो बात ही क्या है, किन्तु अपने घातकका भी अनिष्ट नहीं करता है । जैसे— यदि कोई दुष्ट जन किसी अहिंसा महाव्रतके धारक साधुके लिये गाली देता है या प्राणहरण भी करता है तो भी वह अपने उस घातकका प्रतीकार नहीं करता, प्रत्युत इसके विपरीत वह उसके हितका ही चिन्तन करता है । वह सोचता है कि यह बिचारा अज्ञानी प्राणी अज्ञानवश कुमार्गमें प्रवृत्त हो रहा है, वह कब कुमार्गको छोड़कर सन्मार्गमें प्रवृत्त होगा, आदि । इसके विपरीत जिसके हृदयमें वह दयामय धर्म नहीं रहता है वह औरकी तो बात क्या, किन्तु अपने पिता और पुत्रका भी घात कर डालता है । ऐसे उदाहरण देखने व सुननेमें जब तब आते ही रहते हैं । इससे यही सिद्ध होता है कि विश्वका कल्याण करनेवाला यदि कोई है तो वह एक धर्म ही हो सकता है ॥ २६ ॥ पाप सुखके अनुभवसे नहीं होता है, किन्तु वह उपर्युक्त धर्मके हेतुभूत अहिंसा आदिको नष्ट करनेवाले प्राणिवधादिके आरम्भसे होता है । ठीक ही है— अजीर्ण कुछ मिष्टान्नके खानेसे नहीं होता है, किन्तु वह निश्चयसे उसके प्रमाणके अतिक्रमणसे ही होता है ॥ विशेषार्थ— जिस प्रकार स्वादके निमित्त परिमित मिष्टान्न आदिके खानेसे कभी अजीर्ण नहीं होता, किन्तु वह जिह्वालम्पट होकर उसे अधिक प्रमाणमें खानेपर ही होता है; उसी प्रकार विषयसुखके अनुभव मात्रसे कुछ पाप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अप्येतन्मृगयादिकं यदि तव प्रत्यक्षदुःखास्पदं
पापैराचरितं पुरातिभयदं सौख्याय संकल्पतः।

पापर्द्धिक्रीडादेर्धर्मवत्सुखहेतुत्वप्रसिद्धेः कथं तद्धेतुघातकारम्भात्पापं स्यात्, पापहेतोः सुखहेतुत्वाविरोधात् इत्याशङ्कां निराकुर्वन्नाह— अप्येतदित्यादि। अपि शब्दः प्रत्येकमभिसंबन्धनीयः। एतत्परिदृश्यमानं मृगयादिकमपि। मृगया पापर्द्धिः। आदिशब्दादनृतचौर्यादिग्रहणम्। किंविशिष्टं तत्। प्रत्यक्षदुःखास्पदमपि प्रत्यक्षतः प्रतीयमानानां तन्निमित्तदुःखानाम्

नहीं होता, किन्तु वह उस सुखकी प्राप्तिके निमित्त अन्याय्य आचरण करनेसे— जैसे प्राणिहत्या, असत्यभाषण, चोरी, परस्त्री या वेश्याका सेवन अथवा अत्यासक्तिसे स्वस्त्रीका भी सेवन और तृष्णाकी अधिकता आदिसे— होता है। यदि प्राणी पूर्वकृत धर्मके प्रभावसे प्राप्त हुई सामग्रीमें ही सन्तोष रखकर धर्मका घात न करता हुआ अनासक्तिपूर्वक उस विषय-सुखका अनुभव करता है तो इससे वह पापसे विशेष लिप्त नहीं होता है। इसके लिये असाधारण वैभवका उपभोग करनेवाले भरत चक्रवर्ती आदिके उदाहरण भी पुराणोंमें देखे ही जाते हैं। यही तो सम्यग्दृष्टि और मिथ्या-दृष्टिके आचारणमें भेद है। कारण कि चारित्रमोहके उदयसे इन्द्रिजन्य सुखके भोगनेमें वे दोनों ही समानरूपसे प्रवृत्त होते हैं, फिर भी विशेषता उनमें यही है कि एक (सम्यग्दृष्टि) तो हेय-उपादेयके विवेकपूर्वक उसमें अनासक्तिसे प्रवृत्त होता है जब कि दूसरा उक्त विवेकको छोड़कर अत्यासक्तिके साथ ही उसमें प्रवृत्त होता है। इसलिए यह नहीं समझना चाहिये कि विषयसुखका अनुभव करते हुए प्राणीके केवल पाप ही होता है और धर्म नहीं होता॥ २७॥ हे भव्य जीव! जो शिकार आदि व्यसन प्रत्यक्षमें ही दुखके स्थानभूत हैं, जिनमें पापी जीव ही प्रवृत्त होते हैं, तथा जो परभवमें दुखदायक होनेसे अतिशय भयानक हैं; वे भी यदि संकल्प मात्रसे तेरे सुखके लिये हो सकते हैं तो फिर विवेकी जन इन्द्रियसुखको न छोड़कर जिस धर्मयुक्त आचरणको

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संकल्पं तमनुज्झितेन्द्रियसुखैरासेविते धीधनैः
धर्म्ये कर्मणि किं करोति न भवाँल्लोकद्वयश्रेयसि ॥ २८ ॥

आस्पदं स्थानम्। तथा पापैराचरितमपि पापिष्ठैः पुरुषैः अनुष्ठितम्। पुरा अतिभयदमपि भवान्तरे प्रचुरदुःखदायित्वात् अतिभयदम्। इत्थंभूतं मृगयादिकमपि यदि तव सौख्याय सौख्यनिमित्तं भवति। कस्मात्। संकल्पतः चित्तोल्लासात्। तदा धर्म्ये कर्मणि धर्मादनपेते कर्मणि हिंसादिविरतिदानदेवपूजादिलक्षणे। तं प्रसिद्धं सौख्यहेतुभूतं संकल्पं किं करोति न भवात् [किं न करोति भवान्]। कथंभूते तस्मिन् धर्म्ये कर्मणि। आसेविते अनुष्ठिते। कैः। धीधनैः विवेकिभिः। किंविशिष्टैः। अनुज्झितेन्द्रियसुखैः विषयसुखमनुभवद्भिः गृहस्थैः अपि अनुष्ठीयमाने। पुनरपि कथंभूते। लोकद्वयश्रेयसि इहलोके परलोके च उपकारकत्वेन प्रशस्ते ॥ २८ ॥ पापर्द्धिक्रीडारतानां अतिनिःकरुणत्वं[1] दर्शयन्नाह— भीतेत्यादि। भीतमूर्तीः

करते हैं तथा जो दोनों ही लोकोंमें कल्याणकारक है उस धर्ममय आचरणमें तू उक्त संकल्पको क्यों नहीं करता है? अर्थात् उसमें ही तुझे सुखकी कल्पना करना चाहिये॥ विशेषार्थ— सुख और दुख वास्तवमें अपने मनकी कल्पनाके ऊपर निर्भर हैं। इस कल्पनाके अनुसार प्राणी जिन पदार्थोंको इष्ट समझता है उनकी प्राप्तिमें वह सुख तथा उनकी अप्राप्तिमें दुखका अनुभव करता है। उसी प्रकार जिन पदार्थोंको उसने अनिष्ट समझ रक्खा है उनके संयोगमें वह दुखी तथा वियोगमें सुखी होता है। परन्तु यथार्थमें यदि विचार किया जाय तो कोई भी वस्तु न तो सर्वथा इष्ट है और न सर्वथा अनिष्ट भी। उदाहरणके रूपमें एक ही समयमें जहां किसी एकके घरपर इष्ट सम्बन्धीका मरण होता है वहीं दूसरेके घरपर पुत्रविवाहादिका उत्सव भी संपन्न होता है। अब जिसके यहां इष्टवियोग हुआ है वह उस एक ही मुहूर्तको अनिष्ट कहकर रुदन करता है और दूसरा उसे ही शुभ घड़ी मानकर अतिशय आनन्दका अनुभव करता है। इससे निश्चित प्रतीत होता है कि जिस प्रकार वह घड़ी (मुहूर्त) वास्तवमें इष्ट और अनिष्ट नहीं है

1 ज निःकरुणात्वं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भीतमूर्तीर्गतत्राणा निर्दोषा देहवित्तकाः।
दन्तलग्नतृणा घ्नन्ति मृगीरन्येषु का कथा॥ २९॥

भयकम्पितगात्राः। गतत्राणाः रक्षणरहिताः। निर्दोषाः दोषरहिताः। देहवित्तकाः देह एव वित्तं धनं यासाम्। घ्नन्ति मारयन्ति ॥ २९ ॥ हिंसाविरतिव्रते दार्ढ्यं विधाय अनृतस्तेयविरतिव्रते

उसी प्रकार कोई भी बाह्य पदार्थ स्वरूपसे इष्ट और अनिष्ट नहीं हो सकता है। उन्हें केवल कल्पनासे ही प्राणी इष्ट व अनिष्ट समझने लगते हैं। प्रकृतमें जिन शिकार आदि दुष्कृत्योंमें प्रत्यक्षमें ही प्राणवियोगादिजन्य दुख देखा जाता है उनके सम्पन्न होनेपर शिकारी जन सुखकी कल्पना करते हैं। पर भला विचार तो कीजिये कि दूसरे दीन प्राणियोंको कष्ट पहुंचानेवाले वे कार्य क्या यथार्थमें सुखकारक हो सकते हैं? नहीं हो सकते। इसीलिये यहां यह उपदेश दिया गया है कि जब सुख और दुख कल्पनाके ऊपर ही निर्भर हैं तब विवेकी जनको उभय लोकोंमें कष्ट देनेवाले उन प्राणिवधादिरूप दुष्कार्योंमें सुखकी कल्पना न करके जो अहिंसा एवं सत्यसंभाषणादि उत्तम कार्य उभय लोकोंमें सुखदायक हैं तथा जिनकी सबके द्वारा प्रशंसा की जाती है उनमें ही सुखकी कल्पना करके प्रवृत्त होना चाहिये ।। २८ ।। जिन हिरणियोंका शरीर सदा भयसे कांपता रहता है, जिनका वनमें कोई रक्षक नहीं है, जो किसीका अपराध (अनिष्ट) नहीं करती हैं, जिनके एक मात्र अपने शरीरको छोड़कर दूसरा कोई धन नहीं है, तथा जो दांतोंके बीचमें अटके हुए तृणोंको धारण करती हैं; ऐसी हिरणियोंका भी घात करनेसे जब शिकारी जन नहीं चूकते हैं तब भला दूसरे (सापराध) प्राणियोंके विषयमें क्या कहा जा सकता है? अर्थात् उनका घात तो वे करेंगे ही॥ विशेषार्थ– यह प्रायः लोकमें प्रसिद्ध ही है कि सच्चे शूर-वीर युद्धनीतिके अनुसार ऐसे किसी भी प्राणीके ऊपर शस्त्रका प्रहार नहीं करते हैं जो कि कायरताको प्रगट कर रहा हो, अरक्षित हो, निरपराध हो,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पैशुन्यदैन्यदम्भस्तेयानृतपातकादिपरिहारात् ।
लोकद्वयहितमर्जय धर्मार्थयशःसुखायार्थम् ॥ ३० ॥
पुण्यं कुरुष्व कृतपुण्यमनीदृशोऽपि
नोपद्रवोऽभिभवति प्रभवेच्च भूत्यै ।

तद्विधानुमाह— पैशुन्येत्यादि । पैशुन्यं परपरिवादः । दैन्यं क्लीवता । दम्भो वञ्चना । स्तेयं चौर्यम् । अनृतम् ऋतं सत्यं न ऋतम् अनृतम् असत्यम् । तेभ्यः पातकानि तान्येव पातकानि [वा] । आदिशब्दात् स्तेनप्रयोगतदाहृतादानादयो गृह्यन्ते । तेषां परिहारात् अनृतविरतिव्रते पैशुन्यदैन्यपरिहारयोरन्तर्भावः स्तेयविरतिव्रते दम्भपरिहारस्यान्तर्भावः । लोकद्वयहितम् इहलोके परलोके हितकारकम् । अर्जय उपार्जय ॥ ३० ॥ ननु व्रतिनामप्युपसर्गे समायाते आत्मरक्षार्थं हिंसानृतादिः क्वचित्स्यादित्यत्राह— पुण्यमित्यादि । कृतपुण्यं पुण्यवन्तं प्राणिनम् । अनीदृशोऽपि

सैन्य व शस्त्रादिसे रहित हो, अथवा दांतोंमें तृणोंको धारण करके अपने पराजयको प्रकट कर रहा हो। इसके अतिरिक्त वे स्त्रियों और बालकोंका घात तो किसी भी अवस्थामें नहीं करते हैं। परन्तु खेद है कि शिकारी जनका वह कार्य इससे सर्वथा विपरीत होता है— जहां वीर पुरुष उपर्युक्त अवस्थाओंमेंसे किसी एक ही अवस्थाके होनेपर प्राणीका घात नहीं करते हैं वहां शिकारी जन हिरणियोंमें उन सभी अवस्थाओं (कायरता, अरक्षितता, निरपराधता, शस्त्रादिहीनता, दन्तस्थतृणता और स्त्रीत्व) के रहनेपर उनका निर्दयतासे घात करते हैं। ऐसी अवस्थामें वे अन्य सापराध प्राणियोंका घात किये विना भला कैसे रह सकते हैं? अतएव उनका यह कार्य सर्वथा निन्दनीय तो है ही, साथमें वह उभय लोकोंमें उन्हें दुख देनेवाला भी है ॥२९॥ हे भव्य जीव ! तू परनिन्दा, दीनता, छल-कपट, चोरी और असत्यभाषण आदि पापोंको छोड़कर उनके प्रतिपक्षभूत सत्यसंभाषण एवं अचौर्य व्रतोंको— जो दोनों ही लोकोंमें हितकारक हैं— धारण कर। कारण कि ये सबके लिये धर्म, धन, कीर्ति और सुखके कारणभूत हैं ॥ ३० ॥ हे भव्य जीव ! तू पुण्य कार्यको कर, क्योंकि पुण्यवान् प्राणीके ऊपर असाधारण भी उपद्रव कुछ प्रभाव नहीं डाल सकता है। इतना ही नहीं, बल्कि वह

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संतापयञ्जगदशेषमशीतरश्मिः
पद्मेषु पश्य विदधाति विकाशलक्ष्मीम् ॥ ३१ ॥

नेता यत्र बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावणो वारणः।

अद्वितीयोऽपि। उपद्रवो नाभिभवति न अभिभवं कुर्यात्। स प्रभवेच्च संपद्यते च। भूत्यै विभूतिनिमित्तम्। ननूपसर्गस्यापकारकत्वात्कथं विभूतिहेतुत्वम्, न हि विषं जीवितहेतुर्भवतीत्याशङ्क्याह संतापयन्नित्यादि। अयमर्थः— यथा अशीतरश्मेरादित्यस्य संतापो जगत्यपकारं कुर्वन्नपि पद्मेषूपकारहेतुर्भवति तथा अपुण्यवति उपद्रवोऽपकाराय प्रवृत्तोऽपि पुण्यवति उपकारनिमित्तं भवतीति ॥ ३१ ॥ अथोच्यते पौरुषादेव शत्रूनभिभूय उपसर्गस्य निवारयितुं शक्यत्वात् अलं पुण्येन इत्याशङ्क्याह— नेता यत्रेत्यादि। नेता मन्त्री। सैनिकाः भृत्याः सेनायां समवेताः सैनिकाः। 'सेनाया वा' [जैनेन्द्रम. ३।३।१६६] इति इकण्। अनुग्रहः

उपद्रव भी उसके लिये सम्पत्तिका साधन बन जाता है। देखो, समस्त संसारको संतप्त करनेवाला भी सूर्य कमलोंमें विकासरूप लक्ष्मीको ही करता है ॥ विशेषार्थ— जिस प्रकार सूर्य दूसरोंको संतापकारक भले ही हो, किन्तु वह कमलोंको तो प्रफुल्लित ही करता है, उसी प्रकार जो उपद्रव अन्य पापी प्राणियोंके लिये कष्टदायक होता है वही पुण्यात्मा जीवोंके लिये सुखका साधन बन जाता है। देखो, अग्नि प्राणघातक है यह सब ही अनुभव करते हैं, परन्तु वह प्रज्वलित भयानक अग्नि भी सीता महासतीके लिये जलरूप परिणत हो गई थी। यह सब उस पुण्यका ही प्रभाव है। इसीलिये सुखकी अभिलाषा करनेवाले भव्य जीवोंके लिये पाप कार्योंको छोड़कर सदा पुण्य कार्योंमें प्रवृत्त होना चाहिये ॥३१॥ जिसका मंत्री बृहस्पति था, शस्त्र वज्र था, सैनिक देव थे, दुर्ग (किला) स्वर्ग था, हाथी ऐरावण था, तथा जिसके ऊपर विष्णुका अनुग्रह (सहायता) था; इस प्रकार अद्भुत बलसे संयुक्त भी वह इन्द्र युद्धमें दैत्यों (अथवा रावण आदि) द्वारा पराजित हुआ है। इसीलिये यह स्पष्ट है कि निश्चयसे दैव (भाग्य) ही प्राणीका रक्षक है। पुरुषार्थ व्यर्थ है,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्याश्चर्यबलान्वितोऽपि बलभिद्भग्नः परैः सङ्गरे
तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥ ३२ ॥

सहायत्वं वरो वा। हरेर्विष्णोः। वारणः हस्ती। इत्याश्चर्यबलान्वितोऽपि एवंविधः सातिशयबलयुक्तोऽपि। बलभिदिन्द्रः। भग्नः पराजितः परैः। कैः। रावणादिशत्रुभिः। सङ्गरे संग्रामे। तद् व्यक्तं सर्वप्रसिद्धमेतत्। अथवा. तत्तस्मात् व्यक्तं स्फुटम्। ननु अहो पौरुषवादिन्। तथापि दैवमेव शरणम्। धिक् धिक् अतिशयेन निन्द्यं पौरुषम्। अतो दैवरहितं वृथा विफलं पौरुषम् ॥ ३२ ॥ ननु हिंसादिविरतिप्रभवस्य अदृष्टस्य इदानीम्

उसके लिये वारंवार धिक्कार हो ॥ विशेषार्थ— इससे पूर्वके श्लोकमें पुण्यको प्रधान बतलाकर उसको उपर्जित करनेकी प्रेरणा की गई है। इसपर शंका उपस्थित हो सकती थी कि शत्रु आदिके द्वारा जो उपद्रव आरम्भ किया जाता हैं उसे पुरुषार्थके बलपर ही नष्ट किया जा सकता है, न कि दैवके ऊपर निर्भर रहते हुए अकर्मण्य बनकर। इसलिये अनुभव-सिद्ध पुरुषार्थको छोड़कर अदृष्ट दैवके ऊपर निर्भर रहना बुद्धिमानी नहीं कही जा सकती है। इस आशंकाको ध्यानमें रखकर यहां इन्द्रका उदाहरण देते हुए यह बतलाया है कि देखो जो इन्द्र बृहस्पति आदिरूप असाधारण साधन सामग्रीसे सम्पन्न था वह भी मनुष्य कहे जानेवाले रावण आदिके द्वारा पराजित किया गया है (प. च. पर्व १२)। यदि पुरुषार्थ ही कार्यसिद्धिका कारण होता तो वह देवोंका अधीश्वर कहा जानेवाला इन्द्र रावण आदि पुरुषोंके द्वारा कभी पराजित नहीं हो सकता था, क्योंकि, उसका पुरुषार्थ असाधारण था। परन्तु वह पराजित अवश्य हुआ है। इससे यह सिद्ध होता है कि दैवके आगे पुरुषार्थ कुछ कार्यकारी नहीं है। यह उन लोगोंको लक्ष्य करके कथन किया गया है जो सर्वथा दैवकी उपेक्षा करके केवल पुरुषार्थके बलपर ही कार्यसिद्धि करना चाहते हैं। वास्तवमें यदि विचार किया जाय तो सर्वथा पुरुषार्थके द्वारा कार्यकी सम्भावना नहीं दिखती। कारण कि हम देखते हैं कि समानरूपसे पुरुषार्थ करनेवाले अनेक व्यक्तियोंमें कुछ यदि सफलताको प्राप्त करते हैं तो कुछ विफलताको भी। एक ही कक्षामें अध्ययन करनेवाले विद्यार्थियोंमें कुछ तो गुरुके द्वारा उपदिष्ट तत्त्वको शीघ्रतासे ही ग्रहण करते हैं, कुछ उसे धीरे धीरे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समझनेमें समर्थ होते हैं, और कुछ प्रयत्न करते हुए भी उसे ग्रहण करनेमें असमर्थ ही रहते हैं। इसी प्रकार उनके परीक्षामें बैठनेपर जिनके प्रथम श्रेणिमें उत्तीर्ण होनेकी आशा की जाती थी वे अनुत्तीर्ण होते हुए देखे जाते हैं तथा जिनके उत्तीर्ण होनेकी सम्भावना नहीं थी वे उत्तम श्रेणिमें उत्तीर्ण होते हुए देखे जाते हैं। इससे निश्चित होता है कि अकेला पुरुषार्थ ही कार्यकरी नहीं है, अन्यथा किया गया पुरुषार्थ कभी निष्फल ही नहीं होना चाहिये था। इसी तरह जिस प्रकार केवल पुरुषार्थसे कार्यकी सिद्धि नहीं हो सकती है उसी प्रकार केवल दैवसे भी कार्यकी सिद्धि सम्भव नहीं है। कारण यह कि यदि सर्वथा दैवको ही कार्यसाधक स्वीकार किया जाय तो यह शंका होती है कि वह दैव भी उत्पन्न कैसे हुआ? यदि वह दैव पूर्व पुरुषार्थके द्वारा निष्पन्न हुआ है तब तो सर्वथा दैवकी प्रधानता नहीं रहती है, और यदि वह भी अन्य पूर्व दैवके निमित्तसे आविर्भूत हुआ है तो फिर वैसी अवस्थामें दैवकी परम्पराके चलते रहनेसे कभी मोक्षकी भी सिद्धि नहीं हो सकेगी। इसलिये मोक्षके निमित्त किया जानेवाला प्रयत्न निष्फल ही सिद्ध होगा। अतएव जब उन दोनोंमें अन्यकी उपेक्षा करके किसी एक (दैव या पुरुषार्थ) के द्वारा कार्यकी सिद्धि नहीं हो सकती है तब यहां ऐसा निश्चय करना चाहिये कि प्रत्येक कार्यकी सिद्धिमें वे दोनों ही कारण होते हैं। हां, यह अवश्य है कि उनमेंसे यदि कहीं दैवकी प्रधानता और पुरुषार्थकी गौणता होती है तो कहीं पुरुषार्थकी प्रधानता और दैवकी गौणता भी होती है। जैसे कि स्वामी समन्तभद्राचार्यने कहा भी है— अबुद्धिपूर्वापेक्षायामिष्टानिष्टं स्वदैवतः। बुद्धिपूर्वव्यपेक्षायामिष्टानिष्टं स्वपौरुषात्॥ आ. मी. ९१. अभिप्राय इसका यह है कि पूर्वमें वैसा कुछ विचार न करनेपर भी जब कभी अकस्मात् ही इष्ट अथवा अनिष्ट घटना घटती है, तब उसमें दैवको प्रधान और पुरुषार्थको गौण समझना चाहिये। जैसे— अकस्मात् भूमिके खोदने आदिमें धनकी प्राप्ति अथवा यात्रा करते हुए किसी दुर्घटनामें मरणकी प्राप्ति। उसी प्रकार पूर्वापर विचार करनेके पश्चात् वैसा प्रयत्न

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भर्तारः कुलपर्वता इव भुवो मोहं विहाय स्वयं
रत्नानां निधयः पयोधय इव व्यावृत्तवित्तस्पृहाः।
स्पृष्टाः कैरपि नो नभो विभुतया विश्वस्य विश्रान्तये
सन्त्यद्यापि चिरन्तनान्तिकचराः सन्तः कियन्तोऽप्यमी ॥ ३३ ॥

अनुष्ठातारो असंभाव्याः, पूर्वमेव तेषां वार्तामात्रेण श्रूयमाणत्वात् इति वदन्तं प्रत्याह— भर्तार इत्यादि। भर्तारो अभ्युद्धर्तारः पोषका वा। कस्याः। भुवः पृथिव्याः। कुलपर्वताः इव। इव-शब्दो यथार्थः। यथा कुलपर्वताः षट् हिमवदादयः। किं कृत्वा। मोहं विहाय निर्मोहाः सन्तः। रत्नानां निधयः पयोधयः इव— यथा पयोधयः समुद्राः मुक्ताफलादिरत्नानां निधयः आश्रयाः तथैव ते[1] सम्यग्दर्शनादिरत्नानाम्। कथंभूताः सन्तस्ते निधयः। व्यावृत्तवित्तस्पृहाः व्यावृत्ता विनष्टा वित्तस्य द्रव्यस्य स्पृहा वाञ्छा येषाम्। तथा स्पृष्टाः कैरपि नो— स्पृष्टा लिप्ताः संश्लिष्टाः। कैरपि रागादिमलैः। नो नैव। नभ इव। इव-शब्दोऽत्र द्रष्टव्यः। यथा नभो निर्मलं तथा तेऽपि निर्मलाः इत्यर्थः। तथा विभुतया परममहत्त्वेन। नभ इव विश्वस्य जगतो विश्रान्तये क्लेशापनोदाय अवस्थानाय च। एवंविधगुणोपेताश्चिरन्तनानां महामुनीनां अन्तिकचराः शिष्याः सन्तः सन्मार्गानुष्ठायिनः। अद्यापि इदानीं तेन[इदानींतनेन] कालेन। कियन्तोऽपि प्रतिनियताः। अमी अपि दृश्यमानाः ॥३३॥ एतैरनुष्ठीयमानमार्गबाह्यः

करते हुए जो इष्ट अथवा अनिष्ट फल प्राप्त होता है उसमें पुरुषार्थकी प्रधानता और दैवकी गौणता समझनी चाहिये। जैसे— व्यापार आदि कार्य करके धनका प्राप्त करना अथवा विषभक्षण आदिके द्वारा मरणका प्राप्त करना ॥ ३२ ॥ जो स्वयं मोहको छोड़कर कुलपर्वतोंके समान पृथिवीका उद्धार करनेवाले हैं, जो समुद्रोंके समान स्वयं धनकी इच्छासे रहित होकर रत्नोंके स्वामी हैं, तथा जो आकाशके समान व्यापक होनेसे किन्हींके द्वारा स्पृष्ट न होकर विश्वकी विश्रान्तिके कारण हैं; ऐसे अपूर्व गुणोंके धारक पुरातन मुनियोंके निकटमें रहनेवाले वे कितने ही साधु आज भी विद्यमान हैं ॥ विशेषार्थ— यहां यह आशंका हो सकती थी कि दैवके ऊपर विश्वास रखकर व्रतोंका आचरण करनेवाले मनुष्य इस समय सम्भव नहीं हैं, उनकी केवल पुराणोंमें ही बात

---

१ स तथैते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पिता पुत्रं पुत्रः पितरमभिसंधाय बहुधा
विमोहादीहेते सुखलवमवाप्तुं नृपपदम्।
अहो मुग्धो लोको मृतिजननदंष्ट्रान्तरगतो
न पश्यत्यश्रान्तं तनुमपहरन्तं यमममुम् ॥ ३४ ॥

संसारस्थितिमपश्यन्नयं लोकः किं करोतीत्याह— पिता पुत्रमित्यादि । अभिसंधाय वञ्चित्वा । ईहेते अभिलषतः । सुखलवं सुखस्य लवो लेशो यत्र । अश्रान्तम् अनवरतम् । तनुमपहरन्तं शरीरं विनाशयन्तम् । अमुं लोकप्रसिद्धं यमम् ॥ ३४ ॥ विषयव्यामुग्धस्य पुत्रवधाद्यकृत्य-

सुनी जाती है । इस आशंकाका परिहार करते हुए यहां यह बतलाया है कि वैसे साधु पुरुष कुछ थोड़े-से आज भी यहां विद्यमान हैं, उनका सर्वथा अभाव अभी भी नहीं है । जिस प्रकार हिमालय आदि कुलपर्वत मोहसे रहित होकर पृथिवीको धारण करते हैं उसी प्रकार वे साधु जन भी निर्मोह होकर पृथिवीके प्राणियोंका उद्धार करते हैं, जिस प्रकार समुद्र मोती आदि बहुमुल्य रत्नोंका आश्रय (रत्नाकर) होकर भी स्वयं उनकी इच्छा नहीं करता है उसी प्रकार वे साधु पुरुष भी सम्यग्दर्शन आदिरूप गुण-रत्नोंके आश्रय होकर धनकी इच्छासे रहित होते हैं, तथा जिस प्रकार आकाश किन्हीं पदार्थोंसे लिप्त न होकर अपने व्यापकत्व गुणसे समस्त पदार्थोंको आश्रय देता है; उसी प्रकार वे साधु जन भी रागादि दोषोंसे लिप्त न होकर अपने महात्म्यसे समस्त प्राणियोंके संक्लेशको दूर करके उनको आश्रय देते हैं ॥ ३३ ॥ पिता पुत्रको तथा पुत्र पिताको धोखा देकर प्रायः वे दोनों ही मोहके वश होकर अल्प सुखवाले राजाके पद (सम्पत्ति) को प्राप्त करनेके लिये प्रयत्न करते हैं । परन्तु आश्चर्य है कि मरण और जन्मरूप दाढ़ोंके बीचमें प्राप्त हुआ यह मूर्ख प्राणो निरन्तर शरीरको नष्ट करनेवाले उस उद्यत यमको नहीं देखता है ॥३४॥ जिसके नेत्र इन्द्रियविषयोंके द्वारा अन्धे कर दिये गये हैं अर्थात् विषयोंमें मुग्ध-रहनेसे जिसकी विवेकबुद्धि नष्ट हो चुकी है ऐसा यह प्राणी उस

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अन्धादयं महानन्धो विषयान्धीकृतेक्षणः।
चक्षुषान्धो न जानाति विषयान्धो न केनचित् ॥ ३५ ॥
आशागर्तः प्रतिप्राणि यस्मिन् विश्वमणूपमम्।
कस्य किं कियदायाति वृथा वो विषयैषिता ॥ ३६ ॥

प्रवृत्तौ कारणमाह— अन्धादित्यादि। विषयान्धीकृतेक्षणः अनन्धानि अन्धानि कृतानि अन्धीकृतानि, विषयैः अन्धीकृतानि ईक्षणानि इन्द्रियाणि यस्य ॥ ३५ ॥ किंचित् [किं च] विषयवाञ्छया कृते प्रवृत्तिः, तद्वाञ्छा च प्रतिप्राणि विद्यते, अतः कस्य वाञ्छितसिद्धिः स्यात् इत्याह— आशेत्यादि। आशा एव गर्तः आशागर्तः। यस्मिन् आशागर्ते। विश्वं जगत्। अणूपमं परमाणुतुल्यम्। कस्येत्यादि। कस्य आशावतः। किं जगत्। कियत् कियत्परिमाणम्। विभागेन वंद्य[वट्य]मानम्। आयाति। अतः वृथा। वः युष्माकम्। विषयैषिता विषयाभिलाषित्वम् ॥ ३६ ॥ अतः एव विषयसुखं विहाय विशिष्टपुण्योपार्जनार्थम्

लोकप्रसिद्ध अन्धेसे भी अधिक अन्धा है, क्योंकि अन्धा प्राणी तो केवल चक्षुके ही द्वारा नहीं जान पाता है, परन्तु वह विषयान्ध मनुष्य इन्द्रियों और मन आदिमेंसे किसीके द्वारा भी वस्तुस्वरूपको नहीं जान पाता है ।। ३५ ।। आशारूप वह गड्ढा प्रत्येक प्राणीके भीतर स्थित है जिसमें कि विश्व परमाणुके बराबर प्रतीत होता है। फिर उसमें किसके लिये क्या और कितना आ सकता है? अर्थात् प्रायः नहींके समान ही कुछ आ सकता है। अतएव हे भव्य जीवो! तुम्हारी उन विषयोंकी अभिलाषा व्यर्थ है ।। विशेषार्थ— अभिप्राय इसका यह है कि प्रत्येक प्राणीकी तृष्णा इतनी अधिक बढ़ी हुई है कि समस्त विश्वकी सम्पत्ति भी यदि उसे प्राप्त हो जाय तो भी उसकी वह तृष्णा कभी शान्त नहीं हो सकती है। फिर भला जरा विचार तो कीजिये कि प्राणी तो अनन्त हैं और उनमेंसे प्रत्येककी विषयतृष्णा उसी प्रकारसे वृद्धिंगत है। ऐसी अवस्थामें यदि विश्वकी समस्त सम्पत्तिको भी उनमें विभाजित किया जाय तो उसमेंसे प्रत्येक प्राणीके लिये जो कुछ प्राप्त हो सकता है वह नगण्य ही होगा। अतएव यहां यह उपदेश दिया गया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आयुःश्रीवपुरादिकं यदि भवेत्पुण्यं पुरोपार्जितं
स्यात् सर्वं न भवेन्न तच्च नितरामायासितेऽप्यात्मनि।
इत्यार्याः सुविचार्य कार्यकुशलाः कार्येऽत्र मन्दोद्यमा
द्रागागामिभवार्थमेव सततं प्रीत्या यतन्ते तराम् ॥ ३७ ॥
कः स्वादो विषयेष्वसौ कटुविषप्रख्येष्वलं दुःखिना
यानन्वेष्टुमिव त्वयाऽशुचिकृतं येनाभिमानामृतम्।

एव मुनयः प्रवर्तन्ते, शरीरादेः तस्मिन् सति एव संभवात् इति दर्शयन् आह— आयुः-श्रीरित्यादि। न भवेत् पुण्यं न तत् च आयुरादिकम् अपि भवेत्। आयासिते अपि क्लेशिते अपि आत्मनि। इति एवम्। सुविचार्य। के ते। आर्याः गुणैः गुणवद्भिः वा अर्यन्ते इति आर्याः। कार्ये अत्र ऐहिके आयुरादिकार्ये। मन्दोद्यमाः आदररहिताः। द्राक् शीघ्रम्। आगामिभवार्थं,परलोकसिद्ध्यर्थम्। सततम् अनवरतम्। कया। प्रीत्या प्रसत्त्या। यतन्ते तराम् उद्यमं कुर्वन्ति अत्यर्थम् ॥ ३७ ॥ ननु ऐहिकसुखसाधकेषु दैववशात्प्राप्तेषु विषयेषु कस्मान्मन्दोद्यमो विधीयते इत्याह— कः स्वाद इत्यादि। कटुविषप्रख्येषु कटुविषसदृशेषु यथा कटुविषम् आस्वादितं दाह-संताप-मूर्च्छामरणादिकं करोति तथा विषया अपि। दुःखिना

है कि जब प्राणीकी विषयतृष्णा कभी पूर्ण नहीं हो सकती, बल्कि वह उत्तरोत्तर बढ़ती ही जाती है; तब उन विषयोंकी इच्छा करना ही व्यर्थ है ।। ३६ ।। यदि पूर्वमें प्राप्त किया हुआ पुण्य है तो आयु, लक्ष्मी और शरीर आदि भी यथेच्छित प्राप्त हो सकते हैं। परन्तु यदि वह पुण्य नहीं है तो फिर अपनेको क्लेशित करनेपर भी वह सब (इष्ट आयु आदि) बिल्कुल भी नहीं प्राप्त हो सकता है। इसीलिये योग्यायोग्य कार्यका विचार करनेवाले श्रेष्ठ जन भले प्रकार विचार करके इस लोक सम्बन्धी कार्यके विषयमें विशेष प्रयत्न नहीं करते हैं, किन्तु आगामी भवोंको सुन्दर बनानेके लिये ही वे निरन्तर प्रीतिपूर्वक अतिशय प्रयत्न करते हैं ।।३७।। कडुए विषके सदृश संताप उत्पन्न करनेवाले उन विषयोंमें वह कौन-सा स्वाद (आनन्द) है कि जिसके निमित्तसे उक्त विषयोंको खोजनेके लिये दुखी होकर तूने अपने स्वाभिमान (आत्मगौरव) रूप अमृतको मलिन कर डाला है? अरे, मुझे निश्चय हो चुका है कि तू

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आज्ञातं करणैर्मनःप्रणिधिभिः पित्तज्वराविष्टवत्
कष्टं रागरसैः सुधीस्त्वमपि सन् व्यत्यासितास्वादनः ॥ ३८ ॥
अनिवृत्तेर्जगत्सर्वं मुखादवशिनष्टि यत् ।
तत्तस्याशक्तितो भोक्तुं वितनोर्भानुसोमवत् ॥ ३९ ॥

सता। यान् विषयान्। अन्वेष्टुं वाञ्छितुम्। अलम् अशुचि कृतम्। येन आस्वादेन कृत्वा कारणेन वा। अभिमानामृतम् अभिमान एव अमृतम्। आ ज्ञातं निश्चितं मया। व्यत्यासितास्वादनः विपरीतकृतास्वादनः त्वम्। सुधीः अपि सन् इति कष्टं निन्द्यमेतत्। किंवत्। पित्तज्वराविष्टवत् पित्तज्वरगृहीतवत्। कैः व्यत्यासितास्वादनः। करणैः। किंविशिष्टैः। मनःप्रणिधिभिः मनः प्रणिधिः दूतो येषां मनसो वा प्रणिधयः। तथा रागरसैः विश्वविषयेषु रागरसो येषाम् ॥ ३८ ॥ विषयासक्तस्य भवतः क्वचिदपि अनिवृत्तचेतसः भक्षितुमसामर्थ्यादेव किंचिदुद्ध्रियते इति आह— अनिवृत्तेरित्यादि। अनिवृत्तेः क्वचिदपि विषये हिंसादिनिवृत्तिरहितस्य तव। अवशिनष्टि उद्ध्रियते। तस्य अनिवृत्तिपरिणतस्य तव। वितनोः राहोः ॥३९॥ दैवात् सकरुणचेतसा मोक्षलक्ष्मीप्रार्थितया हिंसानिवृत्तिमिच्छता

विद्वान् होकर भी पित्तज्वरसे पीड़ित मनुष्यकी तरह मनकी दूतीके समान होकर विषयोंमें आनन्द माननेवाली इन्द्रियोंके द्वारा विपरीत स्वादवाला कर दिया गया है।। विशेषार्थ— जिस प्रकार विषके भक्षणसे प्राणीको संताप आदि उत्पन्न होता है उसी प्रकार उन विषयोंके उपभोगसे भी प्राणीको संताप आदि उत्पन्न होता है। अतएव वे विषय विषके ही समान हैं। फिर भी प्राणी उन्हें सुखके कारणभूत एवं स्थायी मानकर उनको प्राप्त करनेके लिये जो अयोग्य आचरण करता हुआ आत्मप्रतिष्ठाको भी नष्ट कर डालता है उसका कारण यह है कि जिस प्रकार पित्तज्वरसे युक्त पुरुषकी जीभका स्वाद विपरीत हो जाता है, जिससे कि उसे मधुर दूध भी कड़ुआ प्रतिभासित होने लगता है, ठीक उसी प्रकार मनसे प्रेरित होकर विषयोंमें अनुरक्त हुईं इन्द्रियोंके दास बने हुए इस संसारी प्राणीको भी मोहवश विषतुल्य उन विषयोंके भोगनेमें आनन्दका अनुभव होता है तथा विषयनिवृत्तिरूप जो निराकुल सुख है वह उसे कड़ुआ प्रतीत होता है ।। ३८ ।। तृष्णाकी निवृत्तिसे रहित अर्थात् अधिक तृष्णासे युक्त होकर भी तेरे मुखसे जो सब जगत् अवशिष्ट बचा है वह तेरी भोगनेकी शक्ति न रहनेसे ही शेष रहा है। जैसे— राहुके

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साम्राज्यं कथमप्यवाप्य सुचिरात्संसारसारं पुनः
तत्त्यक्त्वैव यदि क्षितीश्वरवराः प्राप्ताः श्रियं शाश्वतीम्।
त्वं प्रागेव परिग्रहान् परिहर त्याज्यान् गृहीत्वापि ते
मा भूर्भौतिकमोदकव्यतिकरं संपाद्य हास्यास्पदम् ॥ ४० ॥

भवता मूलतोऽपि परिग्रहः[हृ]त्यागः कर्तव्यः इति दर्शयन्नाह— साम्राज्यमित्यादि। साम्राज्यं चक्रवर्तित्वम्। कथमपि महता कष्टेन। सुचिरात् बहुतरकालेन। संसारसारं संसारे सारम् उत्कृष्टम्। शाश्वतीं [श्रियं] मोक्षलक्ष्मीम्। प्रागेव मूलतोऽपि अगृहीत्वैव। ते त्वया त्याज्यानपि इति संबन्धः। त्याज्यस्य [व्यस्य] वा कर्तरि [जैनेन्द्रम. १।४।७५] इति षष्ठी। इत्थंभूतानपि परिग्रहान् गृहीत्वा। त्वं माभूः हास्यास्पदम्। माभूदिति पाठे ते तव हास्यास्पदं माभूदिति संबन्धः। किं कृत्वा। संपाद्य संयोज्य आत्मनः। किं तत्। भौतिक-मोदकव्यतिकरं परिव्राजकमोदकप्रघट्टकम्। यथैवेह केनचित्परिव्राजकेन भिक्षायां मोदको लब्धः, स च गच्छतो गूथोपरि पतितोऽपि तेन गृहीतोऽन्येन च केनचित् परिव्राजको भणितः विरूपकोऽयं मोदकः परित्यज्यतामिति। तेन चोक्तं[1] प्रक्षाल्य त्यक्ष्यामीति ॥ ४० ॥ शाश्वतश्रियो निर्ग्रन्थावस्थैव साधिका न गृहस्थावस्थेति दर्शयन्नाह—

मुखसे शेष रहे सूर्य और चन्द्र ॥ विशेषार्थ— जिस प्रकार यद्यपि राहु सूर्य और चन्द्रको पूर्णग्रास ही करना चाहता है, फिर भी जो उनका भाग शेष बचा रहता है वह उसकी अशक्तिके कारण ही बचा रहता है, उसी प्रकार प्रत्येक प्राणीकी तृष्णा तो इतनी अधिक होती है कि वह समस्त जगत्को ही स्वाधीन करना चाहता है, फिर भी जो समस्त जगत् उसके स्वाधीन नहीं हो पाता है उसमें उसकी अशक्ति कारण है, न कि विषय-तृष्णाकी न्यूनता ॥ ३९ ॥ जिस किसी प्रकारसे संसारके सार-भूत साम्राज्य (सार्वभौम राज्य) को चिर कालमें प्राप्त करके भी यदि चक्रवर्ती उसे छोड़नेके पश्चात् ही अविनश्वर मोक्ष-लक्ष्मीको प्राप्त हुए हैं तो फिर तुम त्यागनेके योग्य उन परिग्रहों (विषयों) को ग्रहण करनेके पहिले ही छोड़ दो। इससे तुम परिव्राजकके लड्डूके समान विषयोंका सम्पादन करके हंसीके पात्र न बन सकोगे ॥ विशेषार्थ— संसारमें सबसे श्रेष्ठ चक्रवर्तीका साम्राज्य समझा जाता है,

१ ज चोक्ता।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सर्वं धर्ममयं क्वचित्क्वचिदपि प्रायेण पापात्मकं
क्वाप्येतद्द्वयवत्करोति चरितं प्रज्ञाधनानामपि।

सर्वमित्यादि। गेहाश्रमः कर्ता। चरितं कर्म। करोति। कथंभूतं चरितम्। सर्वं धर्ममयं क्वचित् सामायिकाद्यवस्थायां सर्वं चरितं धर्ममयं धर्मः प्रकृतो यत्र। क्वचिदपि क्वापि कृष्यादौ। प्रायेण वाहुल्येन। पापात्मकं पापरूपम्। क्वापि प्रासादादिकरणे एतत् चरितं द्वयवत् पुण्यपापात्मकम्। प्रज्ञाधनानामपि विवेकिनामपि। तत् [यत्] एवं तस्मात् एष गृहाश्रमः पापः। तत्प्रसिद्धम् अन्धरज्जुवलनम्— यथा अन्धो रज्जुवलनं विदधानो न विशिष्टं निरुपद्रवं च विदधाति तथा गेहाश्रमः कर्मेति। स्नानं गजस्याथवा— यथा गजः स्नानं कृत्वा पुनरुद्धूलनं करोति तथा गेहाश्रमः पापशुद्धिं कृत्वा पुनः पापोपार्जनं करोति :

परन्तु उसको कष्टपूर्वक प्राप्त करके भी अन्तमें मोक्षसुखकी इच्छासे उन्हें भी वह छोड़ना ही पड़ा है। और तो क्या कहा जाय, किन्तु तीर्थंकर भी प्राप्त राज्य-लक्ष्मीको छोड़ देनेके पश्चात् ही जगत्का कल्याण करनेवाली आर्हन्त्य-लक्ष्मी और अन्तमें मोक्ष-लक्ष्मीको प्राप्त करते हैं। इस प्रकार जब समस्त विषयोंका छोड़ना अनिवार्य है तब सबसे उत्तम तो यही है कि ममत्वबुद्धिको छोड़कर उन्हें ग्रहण ही न किया जाय, अन्यथा यदि उन्हें ग्रहण करनेके पश्चात् छोड़ा तो फिर उस साधुके समान हंसीका पात्र बनना पड़ेगा जो भिक्षामें प्राप्त हुए लड्डूके विष्ठामें गिर जानेपर उसे धोनेके पश्चात् छोड़ता है। अभिप्राय यह है कि जो प्राणी तदनुकूल धर्मके आचरणके विना ही मोहवश विषयोंको प्राप्त करनेके लिये निष्फल प्रयत्न करते हैं वे लोगोंकी हंसीके पात्र बनते हैं। अतएव वास्तविक सुखका साधन जो धर्म है उसका ही परिपालन करना योग्य है। इससे ऐहिक एवं पारलौकिक सुखकी प्राप्ति स्वयमेव होगी॥ ४०॥

गृहस्थाश्रम विद्वज्जनोंके भी चरित्रको प्रायः किसी सामायिक आदि शुभ कार्यमें पूर्णतया धर्मरूप, किसी विषयभोगादिरूप कार्यमें पूर्णतया पापरूप, तथा किसी जिनगृहादिके निर्मापणादिरूप कार्यमें उभय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्मादेष तदन्धरज्जुवलनं स्नानं गजस्याथवा
मत्तोन्मत्तविचेष्टितं न हि हितो गेहाश्रमः सर्वथा ॥ ४१ ॥

अथवा मत्तोन्मत्तविचेष्टितम्– मत्तो मद्याभिभूतः उन्मत्तो धत्तूर-कोद्रवादिजनितमदो मदरहितो वा तयोश्चेष्टितम् अनुष्ठानं येषां सुन्दरमसुन्दरं च भवति। तथा गेहाश्रमकर्मापि। यत एवं ततः न हि हितः— हि स्फुटं न हितः शाश्वतलक्ष्मीसाधकत्वेनो पकारकः। गेहाश्रमो गृहस्थावस्था ॥ ४१ ॥ तथा गेहाश्रमे कृष्यादिव्यापाराणां सुखस्य असाधकत्वं दर्शयन्नाह—

(पुण्य-पाप) रूप करता है। इसलिये यह गृहस्थाश्रम अन्धेके रस्सी भांजनेके समान, अथवा हाथीके स्नानके समान, अथवा शराबी या पागलकी प्रवृत्तिके समान सर्वथा हितकारक नहीं है।। विशेषार्थ– अन्धा मनुष्य आगे आगे रस्सीको भांजता है, परन्तु वह पीछेसे उकलती जाती है, अतएव जिस प्रकार उसका वह रस्सी भांजना व्यर्थ है; अथवा हाथी पहिले स्नान करता है और तत्पश्चात् वह पुनः अंगपर धूलि डाल लेता है, इसलिये जिस प्रकार उक्त हाथीका स्नान करना व्यर्थ है; अथवा शराबी या पागल मनुष्य कभी उत्तम और कभी निकृष्ट चेष्टा करता है, परन्तु वह विवेकशून्य होनेसे जिस प्रकार हितकारक नहीं है; उसी प्रकार यह गृहस्थाश्रम भी हितकारक नहीं है। कारण यह कि उक्त गृहस्थाश्रममें रहता हुआ मनुष्य जहां जिनपूजा, स्वाध्याय एवं दानादिरूप शुभ कार्योंको करता है वहां वह अर्थोपार्जनके लिये हिंसाजनक आरम्भ एवं विषयसेवनादिरूप पापाचरण भी करता ही है। अतएव अन्धेके रस्सी भांजने आदिके समान वह गृहस्थाश्रम कभी कल्याणकारी नहीं हो सकता है। जीवका सच्चा कल्याण उक्त गृहस्थाश्रमको छोड़ करके निर्ग्रन्थ अवस्थाकी प्राप्तिमें ही सम्भव है।। ४१ ।। तुम यहां सुखको प्राप्त करनेकी आशासे भूमिको जोतकर और बीज बो करके अर्थात् खेती करके, राजाओंकी सेवा करके अर्थात् दासकर्म करके, तथा बहुत वार वनमें और समुद्रमें परिभ्रमण करके अर्थात् व्यापार करके बहुत कालसे क्यों कष्ट सह

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्ट्वोप्त्वा नृपतीन्निषेव्य बहुशो भ्रान्त्वा वनेऽम्भोनिधौ
किं क्लिश्नासि सुखार्थमत्र सुचिरं हा कष्टमज्ञानतः।
तैलं त्वं सिकतास्वयं मृगयसे वाञ्छेद्विषाज्जीवितुं
नन्वाशाग्रहनिग्रहात्तव सुखं न ज्ञातमेतत्त्वया ॥ ४२ ॥

आशाहुताशनग्रस्तवस्तूच्चैर्वंशजां जनाः।
हा किलैत्य सुखच्छायां दुःखघर्मापनोदिनः ॥ ४३ ॥

कृष्ट्वेत्यादि। कृष्ट्वा भूमिं विलिख्य। उप्त्वा बीजं प्रक्षिप्य कृषिं कृत्वेत्यर्थः। नृपतीन् निषेव्य राजसेवां कृत्वा। बहुशो अनेकधा। अम्भोनिधौ समुद्रे। किम् अज्ञानतः क्लिश्नासि क्लेशं व्रजसि। अत्र संसारे। हा विषादे कष्टमेतत्। त्वम् अयम् अज्ञानतः तैलं सिकतासु वालुकासु मृगयसे अन्वेषयसे। ननु अहो। आशाग्रहनिग्रहात् आशैव ग्रहः प्राणिनां पारतन्त्र्यहेतुत्वात्। तस्य निग्रहात् ॥ ४२ ॥ उपदिष्टेऽपि सुखोपाये तदनिग्रहं कुर्वाणाः प्राणिनः एतत्कुर्वन्ति इत्याह— आशेत्यादि। आशैव हुताशनोऽग्निः प्राणिनां संतापकारित्वात्। तेन ग्रस्तानि च तानि वस्तूनि च तान्येव उच्चैर्वंशाः तेभ्यो जातां सुखच्छायां सुखाय छाया सुखस्य वा छाया लेशः। छाया हि प्रकाशावरणं लेशश्चोच्यते। किलैत्य आश्रये अरुचौ लोकोक्तौ वा। एतत्प्राप्य दुःखघर्मापनोदिनः दुःखमेव घर्मो दाहसंतापजनकत्वात् तस्य अपनोदिनः स्फेटकाः भवन्ति ॥ ४३ ॥ सुखलवमात्रमपि दैवात् कथमपि प्राप्तं स्थिरं न

रहे हो ? खेद है कि तुम अज्ञानतासे यह जो कष्ट सह रहे हो उससे ऐसा प्रतीत होता है जैसे कि तुम वालुमें तेल की खोज कर रहे हो अथवा विषभक्षणसे जीनेकी इच्छा कर रहे हो। अभिप्राय यह कि जिस प्रकार वालुमें तेलकी प्राप्ति असम्भव है अथवा विषके भक्षणसे जीवित रहना असम्भव है उसी प्रकार उक्त कृषि आदिके द्वारा यथार्थ सुखका प्राप्त होना भी असम्भव है। हे भव्य ! क्या तुझे यह ज्ञात नहीं है कि तेरा वह अभीष्ट सुख निश्चयतः आशा (विषयाभिलाषा) रूप पिशाचीके नष्ट करनेसे ही प्राप्त हो सकता है ? ॥ ४२ ॥ खेद है कि अज्ञानी प्राणी आशारूप अग्निसे व्याप्त भोगोपभोग वस्तुओंरूप ऊंचे वांसोंसे उत्पन्न हुई सुखकी छाया (सुखाभास=दुख) को प्राप्त करके दुखरूप सन्तापको दूर करना चाहते हैं। विशेषार्थ— जो अज्ञानी प्राणी विषयतृष्णाके वश होते हुए

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

खातेऽभ्यासजलाशयाऽजनि शिला प्रारब्धनिर्वाहिणा
भूयोऽभेदि रसातलावधि ततः कृच्छ्रात्सुतुच्छं किल।

भवति इति दृष्टान्तद्वारेण समर्थयते— खाते इत्यादि। खाते खनने। कया। अभ्यासजलाशया निकटे जलप्राप्तीच्छया। अजनि संजाता। कासौ। शिला। प्रारब्धनिर्वाहिणा खननम्

अभीष्ट भोगोपभोग वस्तुओंको प्राप्त करके यथार्थ सुख प्राप्त करना चाहते हैं उनका यह प्रयत्न इस प्रकारका है जिस प्रकार कि सूर्यके तापसे पीड़ित होकर कोई मनुष्य उस संतापको दूर करनेके लिए अग्निसे जलते हुए ऊंचे वांसोंकी छायाको प्राप्त करनेका प्रयत्न करता है। अभिप्राय यह है कि प्रथम तो ऊंचे वांसोंकी कुछ उपयुक्त छाया ही नहीं पड़ती है, दूसरे वे अग्निसे जल भी रहे हैं, अतएव ऐसे वांसोंकी छायाका आश्रय लेनेवाले प्राणीका वह संताप जिस प्रकार नष्ट न होकर और अधिक बढ़ता ही है उसी प्रकार विषयतृष्णाको शान्त करनेकी अभिलाषासे जो प्राणी इष्ट सामग्रीके संचयमें प्रवृत्त होता है इससे उसकी वह तृष्णा भी उत्तरोत्तर बढती ही है, परन्तु कम नहीं होती। जैसा कि समन्तभद्र स्वामीने भी कहा है— तृष्णार्चिषः परिदहन्ति न शान्तिरासामिष्टेन्द्रियार्थविभवैः परिवृद्धिरेव। स्थित्यैव कायपरितापहरं निमित्तमित्यात्मवान् विषयसौख्यपराङ्मुखोऽभूत्॥ बृ. स्व. ८२. अर्थात् विषयतृष्णारूप अग्निकी ज्वालायें प्राणीको सब ओरसे जलाती हैं। इनकी शान्ति इन्द्रियविषयोंकी वृद्धिसे नहीं होती, बल्कि उससे तो वे और भी अधिक बढ़ती हैं। यह उस तृष्णाका स्वभाव ही है। प्राप्त हुए इष्ट इन्द्रियविषय कुछ थोड़े-से समयके लिये केवल शरीरके संतापको दूर कर सकते हैं। इस प्रकार विचार करके हे जितेन्द्रिय कुन्थु जिनेन्द्र! आप चक्रवर्तीकी भी विभूतिको छोड़कर उस विषयजन्य सुखसे पराङ्मुख हुए हैं॥ ४३॥ निकटमें जलप्राप्तिकी इच्छासे भूमिको खोदनेपर चट्टान प्राप्त हुई। तब प्रारम्भ किये हुए इस कार्यका निर्वाह करते हुए उसने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षारं वार्युदगात्तदप्युपहतं पूतिक्रमिश्रेणिभिः
शुष्कं तच्च पिपासतोऽस्य सहसा कष्टं विधेश्चेष्टितम् ॥ ४४ ॥

अपरित्यज्य[ज]ता। भूयोऽभेदि पुनः स्फोटिता शिला। रसातलावधि पातालपर्यन्तम्। ततः रसातलावधिशिलाभेदनात्। कृच्छ्रात् महता कष्टेन। सुतुच्छं स्वल्पम्। उदगात् निर्गतम्। किं तत्। वारि। तदपि क्षारमपि वारि। उपहतम् उपद्रुतम्। काभिः। पूतिक्रमिश्रेणिभिः पूतिः पूतिगन्धा क्रमिश्रेणयः क्रमिपङ्क्तयः ताभिः। पिपासि[स]तः पातुमिच्छतः। सहसा झटिति। कष्टमिति विषादे। तच्च वारि शुष्कम्। विधेश्चेष्टितं कर्मणो विलसितम् ॥ ४४ ॥

पाताल पर्यन्त खोदकर उस चट्टानको तोड़ दिया। तत्पश्चात् वहां बड़े कष्टसे कुछ थोड़ा-सा जो खारा जल प्रगट हुआ वह भी दुर्गन्धयुक्त और क्षुद्र कीड़ोंके समूहसे व्याप्त था। इसको भी जब वह पीने लगा तब वह भी शीघ्र सूख गया। खेद है कि दैवकी लीला विचित्र है॥ विशेषार्थ—यहां एक उदाहरण द्वारा पुरुषार्थको गौण करके दैवकी प्रधानता निर्दिष्ट की गई है। कल्पना कीजिये कि कोई एक मनुष्य प्याससे अतिशय पीड़ित था। इसलिये जल प्राप्त करनेके लिये वह भूमिको खोदने लगता है। किन्तु कुछ थोड़ा-सा खोदनेपर वहां एक विशाल कठोर चट्टान आ जाती है। इतनेपर भी वह अपने प्रारब्ध कार्यको चालू रखते हुए उस चट्टानको तोड़ कर उसे बहुत अधिक गहरा खोद डालता है। तब कहीं उसे वहां कुछ थोड़ा-सा जल दिखायी देता है, सो भी खारा, दुर्गन्धयुक्त और कीड़ोंसे परिपूर्ण। फिर भी जब वह उसे भी पीना प्रारम्भ करता है तो वह भी देखते ही देखते सूख जाता है। इसको ही दैवकी प्रतिकूलता समझनी चाहिये। तात्पर्य यह कि यदि पापका उदय है तो प्राणी इष्ट विषयसामग्रीको प्राप्त करनेके लिये कितना भी अधिक प्रयत्न क्यों न करे, परंतु वह उसे प्राप्त नहीं हो सकती है। यदि किसी प्रकार कुछ थोड़ी-सी प्राप्त भी हुई तो इससे उसकी तृष्णा अग्निमें डाले हुए घीके समान और भी अधिक बढ़ती जाती है जिससे कि उसे शांति मिलनेके बजाय अशांति ही अधिक प्राप्त होती है। अतएव सुखी रहनेका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शुद्धैर्धनैर्विवर्धन्ते सतामपि न संपदः।
न हि स्वच्छाम्बुभिः पूर्णाः कदाचिदपि सिन्धवः ॥ ४५ ॥
स धर्मो यत्र नाधर्मस्तत्सुखं यत्र नासुखम्।
तज्ज्ञानं यत्र नाज्ञानं सा गतिर्यत्र नागतिः ॥ ४६ ॥

ननु निरवद्यवृत्त्या अर्थोपार्जनं कृत्वा संपदां वृद्धिं विधाय सुखानुभवनं करिष्यामीति वदन्तं प्रत्याह— शुद्धैरित्यादि। शुद्धैः निरवद्यैः। स्वच्छाम्बुभिः निर्मलजलैः। सिन्धवः नद्यः ॥ ४५ ॥ अस्तु नाम यथाकथंचित्तासां वृद्धिस्तथापि धर्मसुखज्ञानसुगतिसाधनत्वमस्तीति मन्यमानं प्राह— स धर्म इत्यादि। यत्र यस्मिन् सति। अनेन यथाख्यातचारित्रस्यैव धर्मत्वम् अनन्तसुखस्यैवा[व] सुखत्वं केवलज्ञानस्यैव ज्ञानत्वं मोक्षगतेरेव गतित्वमुक्तं भवति ॥ ४६ ॥ इत्थंभूतं सुखादिकं कष्टसाध्यम् अर्थोपार्जनं तु सुखसाध्यमतस्तत्रैव प्रवृत्ति-

सरल उपाय यही है कि पूर्व पुण्यसे प्राप्त हुई सामग्रीमें संतोष रखकर भविष्यके लिये पवित्र आचरण करे। कारण यह कि सुखका हेतु एक धर्माचरण ही है, न कि केवल (दैवनिरपेक्ष) पुरुषार्थ ॥४४॥ शुद्ध धनके द्वारा सज्जनोंकी भी सम्पत्तियां विशेष नहीं बढ़ती हैं। ठीक है— नदियां शुद्ध जलसे कभी भी परिपूर्ण नहीं होती हैं॥ विशेषार्थ— जिस प्रकार नदियां कभी आकाशसे बरसते हुए शुद्ध जलसे परिपूर्ण नहीं होती हैं, किन्तु वे इधर उधरकी गंदी नालियों आदिके बहते हुए जलसे ही परिपूर्ण होती हैं; उसी प्रकार सम्पत्तियां भी कभी किसीके न्यायोपार्जित धनके द्वारा नहीं बढ़ती हैं, किन्तु वे असत्यभाषण, मायाचार एवं चोरी आदिके द्वारा अन्य प्राणियोंको पीड़ित करनेपर ही वृद्धिको प्राप्त होती हुई देखी जाती हैं। इससे यहां यह सूचित किया गया है कि जो सज्जन मनुष्य यह सोचते हैं कि न्यायमार्गसे धन-सम्पत्तिको बढ़ाकर उससे सुखका अनुभव करेंगे उनका वह विचार योग्य नहीं है ॥ ४५ ॥ धर्म वह है जिसके होनेपर अधर्म न हो, सुख वह है जिसके होनेपर दुख न हो, ज्ञान वह है जिसके होनेपर अज्ञान न रहे, तथा गति वह है जिसके होनेपर आगमन न हो॥ विशेषार्थ— जो प्राणी यह विचार करते हैं कि भले ही वह सम्पत्ति न्याय्य अथवा अन्याय्य मार्गसे क्यों न प्राप्त होवे, फिर भी उससे धर्म, सुख, ज्ञान और शुभ गतिकी तो सिद्धि होती

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वार्तादिभिर्विषयलोल विचारशून्यं[1]
क्लिश्नासि यन्मुहुरिहार्थपरिग्रहार्थम्।
तच्चेष्टितं यदि सकृत्परलोकबुद्ध्या
न प्राप्यते ननु पुनर्जननादि दुःखम्॥ ४७॥

रित्याशङ्क्याह— वार्तेत्यादि। कृषि[ः]प[पा]शुपाल्यं वाणिज्या च वार्ता सा आदिर्यासां दण्डनीत्यादीनां ताभिः। विषयलोल विषयलम्पट। विचारशून्यम् इत्थम् अर्थोपार्जनं कृतं किं मम परिणामपथ्यं नवेति विचारमकृत्वा। यत् क्लिश्नासि आत्मानम् आयासयसि। मुहुः पुनः पुनः। इह संसारे अर्थपरिग्रहार्थम् अर्थोपार्जनार्थम्। तच्चेष्टितम् आत्मनः क्लेशकारि दुर्धरानुष्ठानम्। यदि सकृत् कदाचित् परलोकबुद्ध्या क्रियते॥ ४७॥ परलोकचेष्टिते

ही है, अतएव उसको उपार्जित करना योग्य ही है। ऐसा विचार करनेवालोंको लक्ष्यमें रखकर यहां यह बतलाया गया है कि वैसी सम्पत्ति धर्म, सुख, ज्ञान और सुगति इनमेंसे किसीको भी सिद्ध नहीं कर सकती है। कारण यह कि धर्मका स्वरुप यह है कि जो दुखको दूर करे। वह धर्म समस्त धन-धान्यादि परिग्रह एवं राग-द्वेषादिको छोड़कर यथाख्यातचारित्रके प्राप्त होनेपर ही हो सकता है, अतः उसकी सिद्धि पापोत्पादक सम्पत्तिके द्वारा कभी नहीं हो सकती है। इसी प्रकार सुख भी वास्तविक वही हो सकता है जिसमें दुखका लेश न हो। ऐसा सुख उस सम्पत्तिसे सम्भव नहीं है। सम्पत्तिके द्वारा प्राप्त होनेवाला सुख आकुलताको उत्पन्न करनेवाला है तथा वह स्थायी भी नहीं है। अतएव वह सम्पत्ति सुखकी भी साधक नहीं है। तथा जिसके प्रगट होनेपर समस्त विश्व हाथकी रेखाओंके समान स्पष्ट दिखने लगता है वही ज्ञान यथार्थ ज्ञान कहलानेके योग्य है। वह ज्ञान (केवलज्ञान) भी उक्त सम्पत्तिसे सिद्ध नहीं हो सकता। जिस गतिसे पुनः संसारमें आगमन नहीं होता है वह पंचम गति (मोक्ष) ही सुगति है। वह सम्यग्दर्शन आदिरूप अपूर्व रत्नत्रयके द्वारा सिद्ध होती है, न कि धन-धान्य आदिके द्वारा। अतएव वैसा विचार करना अविवेकतासे परिपूर्ण है॥ ४६॥

हे विषयलम्पट! तू यहां विषयोंमें मुग्ध होकर विवेकसे रहित होता हुआ

१ मु (नि) शून्यः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संकल्प्येदमनिष्टमिष्टमिदमित्यज्ञातयाथात्म्यको
बाह्ये वस्तुनि किं वृथैव गमयस्यासज्य कालं मुहुः।
अन्तःशान्तिमुपैहि यावददयप्राप्तान्तकप्रस्फुर-
ज्ज्वालाभीषणजाठरानलमुखे भस्मीभवेन्नो भवान्॥ ४८॥

दाढर्योत्पादनार्थं[1] रतिद्वेषौ निराकुर्वन्नाह— संकल्प्येत्यादि। अज्ञातयाथात्म्यकः यथावत्पदार्थ-परिज्ञानरहितः। आसज्य आसक्तो भूत्वा संबंध्य(?) वा। कालं गमयसि नयसि। अन्तः-शान्तिं रागादिपरिहारम्[2]। उपैहि गच्छ। यावन्न भस्मीभवेद्भवान्। क्वेत्याह अदयेत्यादि। अदयो निर्दयः स चासौ प्राप्तश्चासौ अन्तकश्च मृत्युस्तस्य प्रस्फुरन् ज्वालाभीषणश्चासौ जाठरानलश्च तस्य मुखे॥ ४८॥ अन्तःशान्ते[न्ति]रेव च कांक्षानद्या नीत्वा भवसमुद्रे

जो खेती, पशुपालन एवं व्यापार आदिके द्वारा धन कमानेके लिये वार वार कष्ट सहता है वैसी कष्टमय प्रवृत्ति (तपश्चरणादि) परलोककी बुद्धिसे अर्थात् आगामी भवको सुखमय बनानेके लिये यदि एक वार भी करता तो फिर निश्चयसे वार वार जन्म-मरण आदिके दुःखको न प्राप्त करता ॥४७॥ हे भव्य! तू पदार्थके यथार्थ स्वरूपको न जानकर 'यह इष्ट है और यह अनिष्ट है' इस प्रकार मानता हुआ बाह्य वस्तुओं (स्त्री पुत्र एवं धन आदि) में आसक्त होकर व्यर्थमें ही क्यों वार वार समयको विताता है? जब तक तू प्राप्त हुए निर्दय काल (मरण) की प्रगट हुई ज्वालाओंसे भयानक औदर्य अग्निके मुखमें पड़कर भस्मसात् नहीं होता है तबतक राग-द्वेषादिके परिहारस्वरूप आन्तरिक शान्तिको प्राप्त कर ले॥ विशेषार्थ— किसका कब मरण होगा, इसे कोई भी प्राणी नहीं जानता है। इसलिये यहां परलोकको सुखमय बनानेके लिये यह उपदेश दिया गया है कि हे जीव! तू अविवेकी होकर बाह्य पर पदार्थोंमें राग और द्वेष करता हुआ अपने समयको यों ही न विता। कारण कि ऐसा करते हुए तुझे कभी निराकुलता प्राप्त न हो सकेगी। पहिली बात तो यह है कि ये बाह्य पदार्थ अपनी इच्छाके अनुसार प्रायः प्राप्त ही नहीं

१ ज दाढर्योपादनार्थम्। २ ज रामादि०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आयातोऽस्यतिदूरमङ्ग परवानाशासरित्प्रेरितः
किं नावैषि ननु त्वमेव नितरामेनां तरीतुं क्षमः।

पात्यमानस्य भवतस्तरणोपाय इति दर्शयन्नाह— आयातोऽसीत्यादि। अङ्ग अहो। परवान् कर्माधीनः। एनाम् आशासरितम्। क्षमः समर्थः। स्वातंत्र्यम् औदासीन्यं निर्मोहताम्। दुरन्तेत्यादि। दुष्टः अन्तः सामीप्यं यस्य दुःखेन वा अन्तो अवसानो यस्य स चासौ

होते हैं, फिर यदि पुण्यके उदयसे कुछ प्राप्त भी हुए तो वे चिरस्थायी नहीं हैं– किसी न किसी प्रकार उनका वियोग अवश्य होनेवाला है। अतएव हे भव्य जीव! उन अस्थिर बाह्य पदार्थोंमें राग-द्वेष न करके तू अहिंसा आदि सद्व्रतोंका आचरण करता हुआ स्थिर व निराबाध आत्मीक सुखको प्राप्त करनेका प्रयत्न कर। यदि तूने ऐसा न किया और इस बीच मृत्युका ग्रास बन गया तो फिर यह जो आत्महितकी साधक सामग्री (मनुष्यभव आदि) तुझे सौभाग्यसे प्राप्त हो गई है वह दुर्लभ हो जावेगी॥ ४८॥ हे भव्य! तू पराधीन बनकर तृष्णारूपी नदीसे प्रेरित होता हुआ बहुत दूर आ गया है। क्या तू यह नहीं जानता है कि निश्चयसे इस तृष्णारूप नदीको पार करनेके लिये तू ही अतिशय समर्थ है? अतएव तू स्वतन्त्रताका अनुभव कर जिससे कि शीघ्र ही उस तृष्णा-नदीके किनारे जा पहुंचे। यदि तू ऐसा नहीं करता है तो फिर उस विषयतृष्णारूप नदीके प्रवाहमें बहकर दुर्दम यमरूप मगरके खुले हुए गम्भीर मुखसे भयानक ऐसे संसाररूप समुद्रके मध्यमें जा पहुंचेगा॥ विशेषार्थ– जिस प्रकार कोई मनुष्य यदि नदीके प्रवाहमें पड़ जाता है तो वह दूर तक बहता हुआ चला जाता है। ऐसी अवस्थामें यदि वह अपने तैरनेके सामर्थ्यका अनुभव करके उसे पार करनेका प्रयत्न करे तो वह निश्चित ही उससे पार हो सकता है। परन्तु यदि वह व्याकुल होकर अपनी तैरनेकी कलाका स्मरण नहीं करता है तो फिर वह उसके साथ बहता हुआ उस भयानक अपार समुद्रके बीचमें जा पहुंचेगा जहां उसे खानेके

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वातन्त्र्यं व्रज यासि तीरमचिरान्नो चेद् दुरन्तान्तक-
ग्राहव्यात्तगभीरवक्त्रविषमे मध्ये भवाब्धेर्भवेः ॥ ४९ ॥
आस्वाद्याद्य यदुज्झितं विषयिभिर्व्यावृत्तकौतूहलै-
स्तद्भूयोऽप्यविकुत्सयन्नभिलषस्यप्राप्तपूर्वं यथा ।

अन्तकश्च यमः स एव ग्राहो जलचरः तेन व्यात्तं प्रसारितं गम्भीरं महत् तच्च तद्वक्त्रं च तेन विषमे रौद्रे ॥ ४९ ॥ विषयाकांक्षया अभिभूतश्च भवान् [न]भोग्यमपि भुङ्क्ते इत्याह— आस्वाद्येत्यादि । आस्वाद्य भुक्त्वा । यत् स्त्र्यादि । उज्झितं त्यक्तम् । विषयिभिः । कथंभूतैः । व्यावृत्तकौतूहलैः विनष्टस्त्र्यादिरागरसैः । हे जन्तो । अद्य इदानीम् । तत् स्त्र्यादिकं पुनरपि अभिलषसि भोक्तुं वाञ्छसि । कथम् । अप्राप्तपूर्वं यथा भवत्येवं न प्राप्तं

लिये मुखको फाड़कर हिंस्र जलजन्तु (मगर व घड़याल आदि) तत्पर रहेंगे। ठीक इसी प्रकारसे अज्ञानी प्राणी नदीके समान भयावह विषयोंकी तृष्णामें फंसकर उसके कारण मोक्षमार्गसे बहुत दूर हो जाता है। वह यदि यह विचार करे कि मैं स्वयं ही इस विषयतृष्णामें फंसा हूं, अतः इससे छुटकारा पानेमें भी मैं पूर्णतया स्वतन्त्र हूं, मुझे दूसरा कोई परतन्त्र करनेवाला नहीं हैं; तो वह उक्त विषयतृष्णाको छोड़कर मोक्षमार्गमें प्रवृत्त हो सकता है। परन्तु यदि वह अपनी ही अज्ञानतासे ऐसा नहीं करता है तो यह निश्चित है कि इससे वह समुद्रके समान अथाह और अपरिमित उस संसार (निगोदादि पर्याय) के मध्यमें जा पहुंचेगा कि जहांसे उसका निकलना अशक्य होगा और जहां उसे अनन्त वार जन्म-मरणके दुखको सहना पड़ेगा ॥ ४९ ॥ जिन स्त्री आदि भोगोंको विषयी जनोंने भोग करके अनुरागके हट जानेसे छोड़ दिया है उनको (उच्छिष्टको) तू घृणासे रहित होकर फिरसे भी इस प्रकारसे भोगनेकी इच्छा करता है जैसे कि मानों वे कभी पूर्वमें प्राप्त ही न हुए हों। हे क्षुद्र प्राणी! जब तक तू पापसमूहरूप वीर शत्रूकी सेनाकी फहराती हुई ध्वजाके समान इस दुष्ट विषयतृष्णाको नष्ट नहीं कर देता है तब तक क्या तुझे शान्ति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जन्तो किं तव शान्तिरस्ति न भवान् यावद् दुराशामिमा-
मंहःसंहतिवीरवैरिपृतनाश्रीवैजयन्तीं हरेत् ॥ ५० ॥
भङ्क्त्वा भाविभवांश्च भोगिविषमान् भोगान् बुभुक्षुर्भृशं
मृत्वापि स्वयमस्तभीतिकरुणः सर्वाञ्जिघांसुर्मुधा ।

पूर्वं कदाचिद्यत्तत् अप्राप्तपूर्वम् । किं कुर्वन् । अविकुत्सयन् धिक् विषयिणाम् उत्सृष्टमिदम् इत्येवं निन्दयन् । शान्तिः रागाद्युपशमः परमसुखं निर्वाणं वा । दुराशां दुष्टाम् आशाम् । इमां स्त्र्यादिविषयाम् । कथंभूतामित्याह—अंह इत्यादि । अंहांसि पापानि तेषां संहतिः संघातः सैव वीरवैरिपृतना सुभटशत्रुसेना तस्याः श्रीवैजयन्तीं पताकाम् । हरेत् स्फेटयेत् ॥५०॥ तामहरन् भवान् अपरमपि किं कर्तुमिच्छतीत्याह— भङ्क्त्वेत्यादि । भाविभवांश्च स्वर्गादि-परलोकानपि । च शब्दोऽप्यर्थे । कथंभूतान् । भोगिविषमान् भोगिनां व्यसनिनां विषमान्

असामवायिकं मृत्योरेकमालोक्य कंचन।
देशं कालं विधिं हेतुं निश्चिन्ताः सन्तु जन्तवः ॥ ७९॥
अपिहितमहाघोरद्वारं न किं नरकापदा-
मुपकृतवतो भूयः किं तेन चेदमपाकरोत्।

निश्चिन्तैः स्थातव्यमित्याह— असामवायिकमित्यादि। असामवायिकं प्रतिकूलम् अगोचरं वा। विधिं प्रकारम् ॥ ७९॥ एवम् आयुषो नश्वरत्वं प्रतिपाद्य इदानीं स्त्रीनिन्दां कुर्वाणस्तत्कायस्य अपकारहेतुत्वं प्रदर्शयन् 'अपिहितं' इत्याद्याह— अपिहितम् अझम्पितम्।

सम्बन्ध न रखनेवाले किसी एक देशको, कालको, विधानको और कारणको देखकर प्राणी निश्चिन्त हो जावें॥ विशेषार्थ— पूर्व श्लोकमें यह बतलाया गया है कि प्राणीका मरण कब, कहां और किस प्रकारसे होगा; इस प्रकार जब कोई नहीं जान सकता है तब विवेकी जीवोंको यों ही निश्चिन्त होकर नहीं बैठना चाहिये, किन्तु उससे आत्मरक्षाका कुछ प्रयत्न करना चाहिये। इसपर शंका हो सकती थी कि जब उसके काल और स्थान आदिका पता ही नहीं है, तब भला उसका प्रतीकार करके आत्मरक्षा की ही कैसे जा सकती है? इसके उत्तरस्वरूप यहां यह बतलाया है कि यदि उस काल (मरण) के स्थान आदिका पता नहीं है तो न रहे, किन्तु हे प्राणी! तू ऐसे किसी सुरक्षित स्थानको प्राप्त कर ले जहां कि वह पहुंच ही न सकता हो। ऐसा करनेसे उसका प्रतीकार करनेके विना ही तेरी रक्षा अपने आप हो जावेगी। ऐसे सुरक्षित स्थानका विचार करनेपर वह केवल मोक्षपद ही ऐसा दिखता है जहां कि मृत्युका वश नहीं चलता। अतएव बाह्य वस्तुओंमें इष्टानिष्टकी कल्पनाको छोड़कर मोक्षमार्गमें ही प्रवृत्त होना चाहिये, इसीमें जीवका आत्मकल्याण है॥ ७९॥ जिस स्त्रीके शरीरको अज्ञानी जन दुर्लभ मानते हैं उस स्त्रीके शरीरमें हे भव्य! तू किसलिये अनुरक्त हो रहा है? वह स्त्रीका शरीर पुण्य (सुख) को भस्मीभूत करनेके लिये अग्निकी ज्वालाओंके समूहके समान होकर नरकके दुःखोंको प्राप्त करनेके

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुशलविलयज्वालाजाले कलत्रकलेवरे
कथमिव भवानत्र प्रीतः पृथग्जनदुर्लभे ॥ ८० ॥
व्यापत्पर्वमयं विरामविरसं मूलेऽप्यभोग्योचितं
विष्वक्क्षुत्क्षतपातकुष्ठकुथिताद्युग्रामयैश्छिद्रितम् ।

उपकृतवतः वस्त्राभरणादिभिः उपचारं कृतवतः । न च नैव । इदं कलत्रकलेवरम् । अपाकरोत् प्रतिकूलाचरणप्राणविपत्त्याद्यपकारकं कृतवत् । कुशलेत्यादि । कुशलस्य पुण्यस्य विलयाय विनाशाय ज्वालाजाले ज्वालासंघाते । प्रीतः प्रीतिं गतः ॥ ८० ॥ तत्र च प्रीतिं परित्यज्य सर्वथा निःसारं मानुष्यं विशिष्टधर्मोपार्जनेन सफलं कुर्विति शिक्षां प्रयच्छन्नाह— व्यापदित्यादि । विविधा आपदो व्यापदः ता एव पर्वाणि ग्रन्थयः तैर्निर्वृत्तं व्यापत्पर्वमयम् । विरामविरसं विरामे वृद्धत्वे अग्रभागे च विगतरसम् । मूले मूर्ध्नि बालत्वे च अभोग्योचितम्

लिये खुले हुए महा भयानक द्वारके समान है। तथा जिस स्त्रीशरीरको तूने वस्त्राभरणादिसे अलंकृत कर बारबार उपकृत किया है उसने क्या तेरा प्रतिकूल आचरण करके अपकार नहीं किया है? अर्थात् अवश्य किया है। अतएव ऐसे कृतघ्न स्त्रीके शरीरमें अनुराग करना उचित नहीं है ॥ ८० ॥ आपत्तियोंरूप पोरोंसे निर्मित, अन्तमें नीरस, मूलमें भी उपभोगके अयोग्य तथा सब ओरसे भूख, क्षतपात (घाव), कोढ़ और दुर्गन्ध आदि तीव्र रोगोंसे छेद युक्त की गई ऐसी यह मनुष्य पर्याय घुनों (लकड़ीके कीड़ों) से खाये हुए गन्नेके समान केवल नामसे ही रमणीय है। हे भव्य! तू इस निःसार मनुष्य पर्यायको शीघ्र यहां परभवका बीज (साधन) करके सारयुक्त कर ले ॥ विशेषार्थ— यहां मनुष्य पर्यायको काने गन्नेके समान निःस्सार बतलाकर उसके द्वारा योग्य संयम एवं तप आदिका आचरण करके परभवको सुधारनेकी प्रेरणा की गई है। उन दोनोंमें समानता इस प्रकारसे है— जैसे गन्ना पोरोंसे संयुक्त होता है वैसे वह मनुष्य पर्याय अनेक प्रकारके दुःखोंरूप पोरोंसे संयुक्त है, जिस प्रकार गन्ना अन्त (अन्तिम भाग) में नीरस या फीका होता है उसी प्रकार मनुष्य शरीर भी अन्तमें (वृद्धावस्थामें) नीरस (आनन्दसे रहित)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मानुष्यं घुणभक्षितेक्षुसदृशं नामैकरम्यं पुनः
निःसारं परलोकबीजमचिरात्कृत्वेह सारीकुरु ॥ ८१ ॥
प्रसुप्तो मरणाशङ्कां प्रबुद्धो जीवितोत्सवम् ।
प्रत्यहं जनयन्नेष तिष्ठेत् काये कियच्चिरम् ॥ ८२ ॥

अनुभवनायोग्यम् । विष्वगित्यादि । विष्वक् समन्तात् क्षुच्च बुभुक्षा च, क्षतपातश्च[1], कुछं च कुत्सितं च तानि आदिर्येषां जलोदरभगन्दराद्युग्रामयाः तैः छिद्रितं जर्जरीकृतम् इक्षुदण्डकम् । नामैकरम्यं नाम्ना मानुष्यमिति शब्देनैकेन केवलेन रम्यम्, न परैर्धर्मैः । निःसारं अन्तस्तुच्छम् । परलोकबीजं धर्मसाधनत्वेन परलोकोपायम् । इह लोके सारीकुरु सफलं कुरु ॥ ८१ ॥ प्रसुप्तेत्यादि । प्रसुप्तो गाढनिद्राक्रान्तः । मरणाशङ्काम् । प्रबुद्धो जागरितः । जीवितोत्सवं जीविते सति उत्सवः परिजनपरितोषादिं । प्रत्यहं प्रतिदिनम् । एषः आत्मा । कियच्चिरं कियद्बहुकालम् ॥ ८२ ॥ एवं कायस्यात्मोपकारकत्वाभावं प्रतिपाद्य बन्धूनां प्रतिपाद-

होता है, गन्ना यदि मूल (जड़) में उपभोग्यके (चूसनेके) योग्य नहीं होता है तो वह मनुष्यशरीर भी मूल (बाल्यावस्था) में उपभोगके अयोग्य होता है, गन्ना जहां वनस्पतिमें होनेवाले रोगोंसे ग्रसित होकर यत्र तत्र छेदयुक्त हो जाता है वहां मनुष्य शरीर भी क्षुधा एवं घाव आदि रोगोंसे छेदयुक्त (दुर्बल) हो जाता है, तथा जिस प्रकार गन्ना भीतर सारभागसे रहित होता है उसी प्रकार मनुष्य शरीर भी सार (श्रेष्ठ वस्तु) से रहित होता है । इस प्रकार दोनोंमें समानता होनेपर जिस प्रकार किसान उस गन्नेकी गांठोंको बीजके रूपमें सुरक्षित रखकर उनसे पुनः उसकी सुन्दर फसलको उत्पन्न करता है उसी प्रकार विवेकी जनका भी कर्तव्य है कि वे उस निःसार मनुष्यशरीरको आगामी भवका (देवादि पर्याय अथवा सिद्ध पर्याय) का बीज (साधन) बनाकर उसे सफलीभूत करें ॥ ८१ ॥ जब प्राणी सोता है तब वह मृतवत् होकर मरनेकी आशंका उत्पन्न करता है और जब जागृत रहता है तब जीनेके उत्सवको करता है। इस प्रकार प्रतिदिन आचरण करनेवाला यह प्राणी कितने काल तक उस शरीरमें रह सकेगा? अर्थात् बहुत ही थोड़े समय तक रह सकता है, पश्चात् उस शरीरको छोड़ना ही पड़ेगा ॥ ८२ ॥ हे प्राणी ! यदि तूने

१ ज क्षसपातश्च ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्यं वदात्र यदि जन्मनि बन्धुकृत्य-
मात्तं त्वया किमपि बन्धुजनाद्धितार्थम्।
एतावदेव परमस्ति मृतस्य पश्चात्
संभूय कायमहितं तव भस्मयन्ति ॥८३॥
जन्मसंतानसंपादिविवाहादिविधायिनः।
स्वाः परेऽस्य सकृत्प्राणहारिणो न परे परे॥ ८४॥

यन्नाह— सत्यमित्यादि। अत्र संसारे बन्धुकृत्यं बन्धुकार्यम्। हितार्थम् उपकारकम्। आत्तं प्राप्तम्। संभूय मिलित्वा॥ ८३॥ ननु विवाहादिकार्यस्य बन्धुजनान् [त्]प्रतीतेः कथं न ततः तत्कार्यमित्याशङ्क्याह— जन्मेत्यादि। जन्मनः संसारे प्रादुर्भावस्य संतानः प्रवाहः तस्य संपादि संप्रापकं तच्च तद्विवाहादि तस्य विधायिनः कारकाः स्वजनाः। तस्य आत्मनः परे शत्रवः। अपरे स्वजनेभ्योऽन्ये ये ते सकृत्प्राणहारिणः एकदा प्राणविपत्ति-कारिणः। न ते परे शत्रवः॥ ८४॥ अथोच्यते विवाहादिविधानेन धनधान्यकलत्रादि-

---

संसारमें भाई-बन्धु आदि कुटुम्बी जनोंसे कुछ भी हितकर बन्धुत्वका कार्य प्राप्त किया है तो उसे सत्य बतला। उनका केवल इतना ही कार्य है कि मर जानेके पश्चात् वे एकत्रित होकर तेरे अहितकारक शरीरको जला देते हैं॥ विशेषार्थ— बन्धुका अर्थ हितैषी होता है। परन्तु जिन कुटुम्बी जनोंको बन्धु समझा जाता है वे वास्तवमें प्राणीका कुछ भी हित नहीं करते हैं। बल्कि, इसके विपरीत वे राग-द्वेषके कारण बनकर उसका अहित ही करते हैं। इसीलिये विवेकी जनको बन्धुजनमें अनुरक्त न होकर अपने आत्महितमें ही लगना चाहिये॥ ८३॥ जो कुटुम्बी जन जन्म-परम्परा (संसार) को बढ़ाने वाले विवाहादि कार्यको करते हैं वे इस जीवके शत्रु हैं, दूसरे जो एक ही वार प्राणोंका अपहरण करनेवाले हैं वे यथार्थमें शत्रु नहीं हैं॥ विशेषार्थ— जो अपना अहित करे वही वास्तवमें शत्रु है— किन्तु जिसे प्राणी शत्रु मानता है वह सचमुचमें शत्रु नहीं है। कारण यह कि यदि वह अधिकसे अधिक अहित करेगा तो केवल एक वार प्राणोंका वियोग कर सकता है, इससे अधिक वह और कुछ भी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धनरन्धनसंभारं[1] प्रक्षिप्याशाहुताशने।
ज्वलन्तं मन्यते भ्रान्तः शान्तं संधुक्षणक्षणे ॥ ८५ ॥
पलितच्छलेन देहान्निर्गच्छति शुद्धिरेव तव बुद्धेः।
कथमिव परलोकार्थं जरी वराकस्तदा स्मरति ॥ ८६ ॥

संपादकत्वेन वाञ्छितार्थप्रापकत्वात् कथं तेषां शत्रुत्वमिति तदयुक्तमित्याह— धनेत्यादि। रन्ध्यते अनेनेति रन्धनम् इन्धनम्, धनमेव रन्धनं तस्य संभारं संघातम्। प्रक्षिप्य। क्व। आशाहुताशने आशैव हुताशनोऽग्निः तस्मिन्। ज्वलन्तम् आशाहुताशनम्। शान्तम् उपशान्तं मन्यते। भ्रान्तः सन् अविवेकी। संधुक्षणक्षणे आशाग्नेः धनेन्धनैः प्रज्वालनसमये ॥ ८५ ॥ एवं मन्यमानस्य भवतः किं किं भवतीत्यह— पलितेत्यादि। पलितच्छलेन पलितव्याजेन। शुद्धिः निर्मलता। परलोकार्थं परत्रार्थम्। अथवा पर उत्कृष्टो लोको मोक्षः परलोकः तस्य अर्थः

नहीं कर सकता है। किन्तु जो कुटुम्बीजन विवाहादिको करके प्राणीको संसारवृद्धिके कारणोंमें प्रवृत्त करते हैं वास्तविक शत्रु तो वे ही हैं, क्योंकि उनके द्वारा अनेक भवोंका घात होनेवाला है— राग-द्वेषादिकी वृद्धिके कारण होनेसे वे अनेक भवोंको दुखमय बनानेवाले हैं ॥ ८४ ॥ आशा (विषयतृष्णा) रूप अग्निमें धनरूप इन्धनके समूहको डालकर भ्रान्तिको प्राप्त हुआ प्राणी उस जलती हुई आशारूप अग्निको जलनेके समयमें शान्त मानता है ॥ विशेषार्थ— जिस प्रकार अग्निमें इन्धनके डालनेसे वह उत्तरोत्तर बढ़ती ही है— कम नहीं होती— उसी प्रकार अधिक अधिक धनके संचयसे यह विषयतृष्णा भी उत्तरोत्तर बढ़ती ही है— कम नहीं होती। अग्नि जब इन्धनको पाकर अधिक भड़क उठती है तब मूर्खसे मूर्ख प्राणी भी उसे शान्त नहीं मानता। परन्तु आश्चर्य है कि विषयसामग्रीरूप इन्धनको पाकर उस तृष्णारूप अग्निके भड़क उठनेपर भी यह प्राणी उसे (विषयतृष्णाग्निको) और उसमें जलते हुए अपनेको भी शान्त मानता है। यह उसकी बड़ी अज्ञानता है ॥ ८५ ॥ हे भव्य ! बालोंकी धवलताके मिषसे तेरी बुद्धिकी निर्मलता ही शरीरसे निकलती जा रही है। ऐसी अवस्थामें बिचारा वृद्ध उस समय परभवमें

१ मु (जै., नि.) रे धनेन्धनसंभारं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इष्टार्थोद्यदनाशितं भवसुखक्षाराम्भसि[1] प्रस्फुरन्-
नानामानसदुःखवाडवशिखासंदीपिताभ्यन्तरे ।

प्रयोजनम् अनन्तज्ञानादि सम्यग्दर्शनज्ञानादिकारणकलापो वा, अर्थ्यते याच्यते मोक्षो येना-सावर्थ इति व्युत्पत्तेः। जरी जरा अस्यास्तीति जरी, व्रीह्यादेरिन् [जै. म. ४।१।४२] तदा शुद्धि-निर्गमकाले ॥८६॥ ये तु बुद्धिशुद्धियुक्ता मोहानभिभूतचेतसः परलोकार्थं स्मरन्ति ते विरला इत्याह— इष्टार्थेत्यादि। इष्टार्थः स्रग्वनिताचन्दनादिः तस्मादुद्यत्प्रादुर्भवत् तच्च तत् अनाशितं

हित करनेवाले कार्योंका कैसे स्मरण कर सकता है? अर्थात् नहीं कर सकता है ।। विशेषार्थ— वृद्धावस्थाके प्राप्त होनेपर बाल सफेद होने लगते हैं। इसके ऊपर यहां यह उत्प्रेक्षा की गई है कि वह बालोंकी सफेदी क्या है मानों निर्मल बुद्धि ही शरीरसे निकलकर बाहिर आ रही है। अभिप्राय उसका यह है कि वृद्धावस्थामें जैसे जैसे शरीर शिथिल होता जाता है वैसे ही वैसे प्राणीकी बुद्धी भी भ्रष्ट होती जाती है। उस समय उसकी विचारशक्ति नष्ट हो जाती है तथा करने योग्य कार्यका स्मरण भी नहीं रहता है। ऐसी दशामें यदि कोई मनुष्य यह विचार करे कि अभी मैं युवा हूं, इसलिये इस समय इच्छानुसार धन कमाकर विषय-सुखका अनुभव करूंगा और तत्पश्चात् वृद्धावस्थाके प्राप्त होनेपर आत्म-कल्याणके मार्गमें लगूंगा। ऐसा विचार करनेवाले प्राणियोंको ध्यानमें रखकर यहां यह बतलाया है कि वृद्धावस्थामें इन्द्रियां शिथिल और बुद्धि भ्रष्ट हो जातीं है तथा व्रत एवं जप-तप आदि करनेका शरीरमें सामर्थ्य भी नहीं रहता है। इसके अतिरिक्त मृत्युका भी कोई नियम नहीं है— वह वृद्धावस्थाके पूर्वमें भी आ सकती है। अतएव वृद्धावस्थाके ऊपर निर्भर न रहकर उसके पहिले ही, जब कि शरीर स्वस्थ रहता है, आत्म-कल्याणके मार्गमें— व्रतादिके आचरणमें— प्रवृत्त हो जाना अच्छा है ।।८६।।

जो संसाररूप भयानक समुद्र मनोहर पदार्थोंके निमित्तसे उत्पन्न होनेवाले असन्तोषजनक सुखरूप खारे जलसे परिपूर्ण है, जिसका भीतरी भाग अनेक प्रकारके मानसिक दुखोंरूप वडवानलकी ज्वालाओंसे जल रहा

१ मु (जै.नि.) इष्टार्थाद्यदवाप्ततद्भवसुखेक्षा° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मृत्यूत्पत्तिजरातरङ्गचपले संसारघोरार्णवे
मोहग्राहविदारितास्यविवराद्दूरे चरा दुर्लभाः॥ ८७॥

भवम् अतृप्तिजनकं तच्च तत् सुखं च तदेव क्षारम् अम्भो यत्र। प्रस्फुरदित्यादि। प्रस्फुरन्त्यो दीप्ताः ताश्च ताः नानामानसदुःखानि एव वाडवशिखाश्च ताभिः संदीपितं प्रज्वालितम् अभ्यन्तरं यत्र। मृत्यूत्पत्तिजरा एव तरङ्गा ऊर्मयः तरलाश्चपला यत्र। इत्थंभूते संसारलक्षणे घोरार्णवे रौद्रसमुद्रे। मोह इत्यादि। मोह एव ग्राहो जलचरस्तेन विदारितं तच्च तत् आस्यं च मुखं तदेव विवरं तस्मात्। दूरे चराः दूरे प्रवर्तमानाः॥ ८७॥ ततो दूरे चरतो दुर्धरानु-

हैं; तथा जो मरण, जन्म एवं वृद्धत्वरूप लहरोंसे चंचल है; उस भयानक संसार-समुद्रमें जो विवेकी प्राणी मोहरूप हिंस्र जलजन्तुओं (मगर आदि) के फाड़े हुए मुखरूप बिलसे दूर रहते हैं वे दुर्लभ हैं॥ विशेषार्थ— यह संसार भयानक समुद्रके समान है— समुद्रमें जहां तृष्णा (प्यास) को न शान्त कर सकनेवाला खारा जल रहता है वहां संसारमें तृष्णा (विषयाभिलाषा) को न शान्त कर सकनेवाला इष्ट विषयभोगजनित सुख रहता है, समुद्रमें यदि वड़वानलकी ज्वालाओंसे उसका जल जलता रहता है तो संसारमें भी प्राणी अनेक प्रकारके मानसिक दुःखोंसे जलते (संतप्त) रहते हैं; समुद्रमें जहां उसको क्षुब्ध करनेवाली बड़ी बड़ी लहरोंकी परम्परा चलती है वहां संसारमें भी प्राणीको पीड़ित करनेवाली लहरोंके समान जन्म, जरा और मरणकी परम्परा चलती रहती है; तथा समुद्रमें यदि मगर एवं घड़ियाल आदि हिंसक जन्तु रहते हैं तो संसारमें भी घातक मोह रहता है। इस प्रकार संसार और समुद्र इन दोनोंके समान होनेपर जिस प्रकार गम्भीर एवं अपार समुद्रमें गिरे हुए प्राणियोंका उसमें स्थित मगर-मत्स्यादिके मुखसे बचना अशक्य है— विरला ही कोई भाग्यवान् बचता है, उसी प्रकार संसारमें स्थित प्राणियोंका मोहसे बचना अशक्य है— विरले ही विवेकी जीव उसके प्रभावसे बचते हैं॥ ८७॥ निरन्तर प्राप्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अव्युच्छिन्नैः सुखपरिकरैर्लालिता लोलरम्यैः
श्यामाङ्गीनां नयनकमलैरर्चिता यौवनान्तम् ।
धन्योऽसि त्वं यदि तनुरियं लब्धबोधेर्मृगीभि-
र्दग्धारण्ये स्थलकमलिनीशङ्कयालोक्यते ते ॥ ८८ ॥

ध्यानमनुतिष्ठतो भवतः सुलालितापि तनुर्यदीत्थं वने मृगीभिः दृश्यते तदा धन्योऽसीत्याह— अव्युच्छिन्नैरित्यादि । अव्युच्छिन्नैः निरन्तरैः । सुखपरिकरैः स्रग्वनितादिभिः । लालिता उपचयं नीता । तथा अर्चिता अनवरतमवलोकिता । कैः । नयनकमलैः । कथंभूतैः । लोलरम्यैः चञ्चलरमणीयैः । कासाम् । श्यामाङ्गीनां उत्तमनायिकानाम् । कथमर्चिताः । यौवनान्तं यौवनमध्यं यथा भवत्येवम् । लब्धबोधेः प्राप्तरत्नत्रयस्य । दग्धेत्यादि—दग्धा चासौ अरण्ये अटव्यां स्थलकमलिनी च तस्याः शङ्कया संदेहेन ॥ ८८ ॥ इत्थमेव त्वदीयं जन्म सफलं

होनेवाली सुख-सामग्रीसे पालित और यौवनके मध्यमें सुन्दर स्त्रियोंके चंचल एवं रमणीय नेत्रोंरूप कमलोंसे पूजित अर्थात् देखा गया ऐसा वह तेरा शरीर विवेकज्ञानके प्राप्त होनेपर यदि जले हुए वनमें हिरणियोंके द्वारा स्थलकमलिनीकी आशंकासे देखा जाता है तो तू धन्य है— प्रशंसाके योग्य है ।। विशेषार्थ— जिसने निरन्तर सुखसामग्रीको प्राप्त करके विषयसुखका अनुभव किया है तथा यौवनके समयमें जिसको अनेक सुन्दर स्त्रियां चाहती रही हैं वह यदि विवेकज्ञानको प्राप्त करके वनमें स्थित होता हुआ दुर्द्धर तपका आचरण करता है तो तपसे कृश उसके सुकुमार शरीरको देखकर हिरणियोंको जंगलमें आगसे जली हुई स्थल-कमलिनीका भ्रम होने लगता है । ऐसे वे भव्य जीव ही वास्तवमें पुण्यशाली हैं जिन्हें समस्त सुखसामग्रीके सुलभ रहनेपर भी आत्मकल्याणके लिये उसे छोड़नेमें किसी प्रकार क्लेशका अनुभव नहीं हुआ । वे स्तुतिके योग्य हैं । आश्चर्य तो उन जीवोंके ऊपर होता है जो कि यथेष्ट सुखसामग्रीके न मिलनेसे निरन्तर दुखी रहकर भी तद्विषयक मोहको नहीं छोड़ना चाहते हैं ।। ८८ ।। प्राणी बाल्यावस्थामें शरीरके पुष्ट न होनेसे कुछ भी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बाल्ये वेत्सि न किंचिदप्यपरिपूर्णाङ्गो हितं वाहितं
कामान्धः खलु कामिनीद्रुमघने भ्राम्यन् वने यौवने।

स्यान्नान्यथेति दर्शयन्नाह— बाल्येत्यादि। बाल्ये बालत्वे। अपरिपूर्णाङ्गः अपुष्टाङ्गः सन्। कामान्धः कामेन अन्धः विवेकपराङ्मुखः। कामिनीद्रुमघने कामिनीलक्षणद्रुमैः घने, ते वा घना यत्र वने यौवनलक्षणे वने। भ्राम्यन् न किंचिद्धितमहितं वा वेत्सि। मध्ये मध्यमावस्थायाम्। वृद्धतृषा वृद्धा महती सा चासौ तृट् वृद्धतृट् तया। वसु द्रव्यम्। अर्जितुम्।

हित-अहितको नहीं जानता है। यौवन अवस्थामें कामसे अन्धा होकर स्त्रियोंरूप वृक्षोंसे सघन उस यौवनरूप वनमें विचरता है, इसलिये यहां भी वह हिताहितको नहीं जानता है। मध्यम (अधेड़) अवस्थामें पशुके समान अज्ञानी होकर बढ़ी हुई तृष्णाको शान्त करनेके लिये खेती व वाणिज्य आदिके द्वारा धनके कमानेमें तत्पर रहकर खिन्न होता है, अतः इस समय भी हिताहितको नहीं जानता है। तथा वृद्धावस्थाके प्राप्त होनेपर वह अधमरेके समान होकर शरीरसे शिथिल हो जाता है, इसलिये यहां भी हिताहितका विवेक नहीं रहता है। ऐसी दशामें हे भव्य जीव! कौन-सी अवस्थामें धर्मका आचरण करके तू अपने जन्मको सफल कर सकता है ? ॥ विशेषार्थ— बाल्यावस्थामें शरीरके परिपुष्ट न होनेसे प्राणी अपने हिताहितको ही नहीं समझ सकता है। यौवन अवस्थामें प्रायः वह कामसे पीड़ित होकर विषयसामग्रीकी खोजमें रहता है। इसके पश्चात् अधेड़ अवस्थामें वह धनके कमानेमें आसक्त होकर उसके द्वारा वृद्धिंगत धनकी तृष्णाको समाप्त करना चाहता है, परन्तु इससे उसका शान्त होना तो दूर ही रहा, वह उत्तरोत्तर बढ़ती ही अधिक है। अब रही वृद्धावस्था, सो यहां समस्त इन्द्रियां शिथिल हो जाती हैं, शरीर रोगाक्रान्त हो जाता है, तथा स्मृति भी जाती रहती है। इस प्रकारसे वे सब अवस्थायें यों ही वीत जाती हैं और वह अज्ञानी प्राणी कुछ भी आत्महित नहीं कर पाता। किन्तु हां, जो विवेकी प्राणी हैं वे यौवन अवस्थामें विषय-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मध्ये वृद्धतृषार्जितुं वसु पशुः[1] क्लिश्नासि कृष्यादिभि-
र्वार्द्धिक्येऽर्धमृतः[2] क्व जन्म फलि ते[3] धर्मो भवेन्निर्मलः ॥ ८९ ॥
बाल्येऽस्मिन् यदनेन ते विरचितं स्मर्तुं च तन्नोचितं
मध्ये चापि धनार्जनव्यतिकरैस्तन्नास्ति यन्नापितः[4]।

पशुः अज्ञः सन्। क्लिश्नासि। कैः। कृष्यादिभिः। अतस्तत्रापि न किंचिद्धितम् अहितं वा वेत्सि। वार्द्धिके[क्ये] वृद्धत्वे अर्धमृतः कचिदपि व्यापारे अक्षमः। क्व। अवस्थाविशेषे। जन्म। ते तत्र। फलि सफलं स्यात्। तथा धर्मो भवेन्निश्चलः ॥ ८९ ॥ अवस्थात्रयेऽपि अपकारकस्य कर्मणो वशेनेदानीं भवतो वर्तितुम् अनुचितमिति शिक्षां प्रयच्छन्नाह— बाल्येत्यादि।

सुखको भोग करके तत्पश्चात् उसे उच्छिष्टके समान छोड़ देते हैं और आत्मकल्याणके मार्गमें प्रवृत्त हो जाते हैं। कुछ ऐसे भी महापुरुष होते हैं जो उन कष्टदायक विषयोंमें अनुरक्त न होकर प्रारम्भमें ही संयम एवं तप आदिके साधनेमें प्रवृत्त हो जाते हैं। परन्तु ऐसे महापुरुष विरले ही हैं, अधिक प्राणी तो वे ही अज्ञानी जीव हैं जो पूर्वोक्त अवस्थाओंमेंसे किसी भी अवस्थामें आत्महितको नहीं करते हैं ॥ ८९ ॥

हे दुर्बुद्धि प्राणी! इस विधि (कर्म) ने बाल्यकालमें जो तेरा अहित किया है उसका स्मरण करना भी योग्य नहीं है। मध्यम अवस्थामें भी ऐसा कोई दुख नहीं है जिसे कि उसने धनोपार्जन आदि कष्टप्रद कार्योंके द्वारा तुझे न प्राप्त कराया हो। वृद्धावस्थामें भी उसने तुझे तिरस्कृत करके निर्दयतापूर्वक दांत तोड़ देने आदिका प्रयत्न किया है। फिर देख तो सही कि तेरा इतना अहित करनेपर भी आज भी तू उक्त कर्मके ही वशीभूत होकर प्रवृत्ति करनेकी इच्छा करता है॥ विशेषार्थ— यह अज्ञानी प्राणी दूसरोंके विषयमें हित और अहितकी कल्पना करके तदनुसार उन्हें मित्र और शत्रु समझने लगता है। परन्तु वास्तवमें जो उसका अहितकारी शत्रु कर्म है उसकी ओर इसका ध्यान ही नहीं जाता

१ मु (जै.) पशो। २ मु (जै., नि.) °र्वृद्धो वार्द्धमृतः। ३ मु (जै.) फलितं। ४ मु (जै., नि.) °स्तन्नार्पितं यत्त्वयि।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वार्द्धिक्ये[1]ऽप्यभिभूय दन्तदलनाद्याचेष्टितं निष्ठुरं
पश्याद्यापि विधेर्वशेन चलितुं वाञ्छस्यहो दुर्मते ॥ ९० ॥

अनेन विधिना विरचितं कृतम्। व्यतिकरैः प्रघट्टकैः। नापितः न प्रापितः। अभिभूय पराभवं कृत्वा। आचेष्टितम् आचरितम्। निष्ठुरम् अमनोज्ञम्। चलितुं प्रवर्तितुम् ॥ ९० ॥

है। जीव बाल्यावस्थामें जो गर्भ एवं जन्म आदिके असह्य दुखको भोगता है उसका कारण वह कर्म ही है। तत्पश्चात् यौवन अवस्थामें भी उक्त कर्मके ही उदयसे प्राणी कुटुम्बके भरण-पोषणकी चिन्तासे व्याकुल होकर धनके कमाने आदिमें लगता है और निरन्तर दुःषह दुखको सहता है। इसी कर्मके निमित्तसे वृद्धावस्थामें इन्द्रियां शिथिल पड़ जाती हैं, शरीर विकृत हो जाता है, और दांत टूट जाते हैं। इस प्रकार जो कर्म सब ही अवस्थाओंमें उसका अनिष्ट कर रहा है उसे अहितकर न मानकर यह अज्ञानी प्राणी आगे भी उसीके वशमें रहना चाहता है। लोकमें देखा जाता है कि जो मनुष्य किसीका एक वार भी अनिष्ट करता है उससे वह भविष्यमें किसी प्रकारका सम्बन्ध नहीं रखता। इसी प्रकार यदि कोई दांत तोड़ना तो दूर रहा, किन्तु यदि दांत तोड़नेके लिये कहता ही है तो मनुष्य उसे अपना अपमान करनेवाला मानकर यथाशक्ति उसके प्रतीकारके लिये प्रयत्न करता है। फिर देखो कि जो कर्म एक वार ही नहीं, किन्तु वार वार प्राणीका अनिष्ट करता है तथा दांत तोड़नेके लिये कहताही नहीं, वल्कि वृद्धावस्थामें उन्हें तोड़ ही डालता है; उस अहितकर कर्मके ऊपर इस प्राणीको क्रोध नहीं आता। इसीलिये उसका प्रतीकार करना तो दूर रहा, किन्तु वह भविष्यमें भी उसी कर्मके अधीन रहना चाहता है॥ ९० ॥

हे वृद्ध! तेरे कान दूसरोंके निन्दावाक्योंको नहीं सुननेकी इच्छासे ही मानो तिरस्कृत अर्थात् नष्ट हो गये– बहरे हो गये। नेत्र मानो तेरी घृणित अवस्थाको देखनेमें असमर्थ होकर ही अन्धेपनको प्राप्त हो गये हैं। यह

१ मु (जै., नि.) वार्द्धक्ये।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अश्रोत्रीव तिरस्कृतापरतिरस्कारश्रुतीनां श्रुतिः
चक्षुर्वीक्षितुमक्षमं तव दशां दूष्यामिवान्ध्यं गतम्।
भीत्येवाभिमुखान्तकादतितरां कायोऽप्ययं कम्पते
निष्कम्पस्त्वमहो प्रदीप्तभवनेऽप्यासे[स्से] जराजर्जरे॥ ९१॥

वृद्धावस्थायामिन्द्रियादीनामेवंविधां प्रवृत्तिं पश्यतस्तव [1]निश्चिन्तमवस्थानमयुक्तमित्याह— अश्रोत्रीवेत्यादि। श्रुतिः श्रोत्रम्। तिरस्कृता ते नष्टाः [नष्टा]। कथंभूतेव। अश्रोत्रीव श्रोतुमनिच्छतीव। कासाम्। परतिरस्कारश्रुतीनां परनिन्दावचनानाम्। तव दशां तव वृद्धावस्थाम्। दूष्यां निन्द्याम्। वीक्षितुं द्रष्टुम्। अक्षममिव अशक्तमिव। चक्षुः आन्ध्यं गतम्। भीत्येव भयेनेव। निःकम्पः परलोकव्यापारचिन्तारहितः। त्वम्। अहो आश्चर्यम्। प्रदीप्तभवनेऽपि प्रदीप्तं भवनमिव प्रदीप्तभवनमं जराव्याध्याद्युपहतं शरीरम्। तत्रापि आसे[स्से] तिष्ठसि॥ ९१॥ तत्र तिष्ठतो जीवस्य शिक्षां प्रयच्छन्नतिपरिचितेष्वित्याद्याह—

शरीर भी तेरा सन्मुख आनेवाले यम (मृत्यु) से मानो भयभीत हो करके ही अतिशय कांप रहा है। फिर भी आश्चर्य है कि तू जलते हुए घरके समान उस वृद्धत्वसे शिथिल हुए शरीरमें निश्चल रह रहा है॥ विशेषार्थ— वृद्धावस्थामें कान वहरे हो जाते हैं, आंखें अन्धी हो जाती हैं, और शरीर कांपने लगता है। यह शरीरकी अवस्था बुढ़ापेमें स्वभावत: हो जाया करती है। इसपर यहां यह उत्प्रेक्षा की गई है कि बुढ़ापेमें प्राय: घर व बाहिरके सब ही जन तिरस्कार करने लगते हैं, उन निन्दावाक्योंको न सुननेकी ही इच्छासे मानो वृद्धके कान बहरे हो जाते हैं। इसी प्रकार उस अवस्थामें मुंहसे लार बहने लगती है, कपड़ोंमें मल-मूत्रादि हो जाता है, तथा निरन्तर खांसी व कफ आदि बना रहता है; इस प्रकारकी घृणाजनक अवस्थाको न देख सकनेके ही कारण मानो वृद्धकी आंखें अन्धी हो जाती हैं। वह बुढ़ापा क्या है मरणकी निकटताकी सूचना ही है, उसीके भयसे मानो वृद्धका शरीर कांपने लगता है। वह वृद्धावस्थाका शरीर आगसे जलते हुए महलके समान नष्ट हो जानेवाला है। फिर भी आश्चर्य

१ ज निश्चिन्त्य°।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतिपरिचितेष्ववज्ञा नवे भवेत् प्रीतिरिति हि जनवादः।
तं किमिति मृषा कुरुषे दोषासक्तो गुणेष्वरतः॥ ९२ ॥

जनवादः लोकवादः। तं जनवादम्। किमिति इति एवं वक्ष्यमाणन्यायेन किं मृषा कुरुषे। दोषा हि रागद्वेषमोहादयः अतिपरिचिताः, सर्वत्र सर्वदा सर्वैः प्राणिभिः अनादिसंसारे अनुभूतत्वात्। गुणास्तु सम्यग्दर्शनादयः नवाः, कदाचिदपि अननुभूतत्वात्। ततो दोषेषु आसक्तेन गुणेषु च अनुरागरहितेन भवता जनवादोऽसत्यः कृतः इति ॥ ९२ ॥ दोषासक्तेन

है कि जब घरमें आग लग जाती है तब उसके भीतर स्थित प्राणी व्याकुल होकर बाहिर निकलनेका प्रयत्न करते हैं; परन्तु वह वेसुध हुआ वृद्ध उस नष्टप्राय शरीरसे मोहको नहीं छोड़ता और इसीलिये वह परभवको सुखमय बनानेके लिये कुछ प्रयत्न भी नहीं करता है ॥ ९१ ॥ अत्यन्त परिचित वस्तुमें अनादरबुद्धि और नवीनमें प्रेम होता है, यह जो किंवदन्ती (प्रसिद्धि) है उसे तू दोषोंमें आसक्त तथा गुणोंमें अनुराग रहित होकर क्यों असत्य करता है? ॥ विशेषार्थ— लोकमें प्रसिद्धि है कि जो वस्तुएं अनेक वार परिचयमें (उपभोगमें) आ चुकी हैं उनमें अनुराग नहीं रहता है, इसके विपरीत जो वस्तु पूर्वमें कभी परिचयमें नहीं आयी है उसके विषयमें प्राणीका विशेष अनुराग हुआ करता है। परन्तु पूर्वोक्त जीवकी दशा इसके सर्वथा विपरीत है— जो दोष (राग-द्वेषादि) जीवके साथ चिर कालसे सम्बद्ध हैं उनसे वह अनुराग करता है तथा जो सम्यग्दर्शनादि गुण उसे पूर्वमें कभी भी नहीं प्राप्त हुए हैं उनमें वह अनुराग नहीं करता है। इस प्रकारसे वह उपर्युक्त लोकोक्तिको भी असत्य करना चाहता है ॥ ९२ ॥ कमलको हंस नहीं खाते हैं, वह जलमें उत्पन्न होकर भी उससे चूंकि संगत नहीं होता है अतएव कठोर है, तथा वह दिनमें विकसित होकर रात्रिमें मुकुलित हो जाता है। यह सब विचार भ्रमर नहीं करता है। इसीलिये वह उसकी गन्धमें आसक्त होता हुआ रात्रिमें उसके संकुचित हो जानेपर उसीके भीतर मरणको प्राप्त होता है। ठीक है— व्यसनी जनको अपने हिताहितका विचार नहीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हंसैर्न भुक्तमतिकर्कशमम्भसापि नो संगतं दिनविकासि सरोजमित्थम्।
नालोकितं मधुकरेण मृतं वृथैव प्रायः कुतो व्यसनिनां स्वहिते विवेकः॥९३॥
प्रज्ञैव दुर्लभा सुष्ठु दुर्लभा सान्यजन्मने।
तां प्राप्य ये प्रमाद्यन्ते ते शोच्याः खलु धीमताम्॥ ९४॥

च व्यसनिना हिताहितमपरिभावयता संसारे मरणादिदुःखमनुभूतमिति सदृष्टान्तं दर्शयन्नाह— हंसैरित्यादि। हंसैः पक्षिविशेषैः पुरुषविशेषैश्च गणधरदेवादिभिः। न भुक्तं न भक्षितं न सेवितं वा। यतः अतिकर्कशम् अकोमलं संसारदुःखदायि च। अम्भसा जलेन स्वच्छस्वभावेन च। नो संगतं नैकतां गतम्। दिनविकासि दिवसे असंकुचितम्। सरोजं पद्मं शरीरं च। सर इव शरीरं शुक्रशोणितसमुदायः, तत्र जातं इति कृत्वा। इत्थम् अनेन प्रकारेण। नालोकितं मधुकरेण भ्रमरेण विटेन च॥ ९३॥ तदवलोकने च सम्यग्ज्ञानभावः कारणम्, संसारे परिभ्रमतः प्राणिनः तत्प्राप्तेरतिदुर्लभत्वादित्याह— प्रज्ञैवेत्यादि। प्रज्ञैव, न भोगोपभोगादिकम्। अन्यजन्मने परत्र निमित्तम्। प्रमाद्यन्ति अकृतादरा भवन्ति॥ ९४॥

रहता है॥ विशेषार्थ— यहां भ्रमरका उदाहरण देकर यह बतलाया है कि जिस प्रकार भ्रमर कमलके विषयमें यह नहीं सोचता है कि इसका भक्षण हंस नहीं करते हैं, वह (कृतघ्न) जिस जलमें उत्पन्न हुआ है उसीसे अलिप्त रहता है, तथा वह रात्रिमें मुकुलित होकर प्राणोंका घातक बनेगा; इसीलिए वह उसमें आसक्त रहकर वहीं मरणको प्राप्त होता है। ठीक इसी प्रकारसे विषयी जन भी यह विचार नहीं करते हैं कि इन विषयोंका उपभोग हंसोंके समान महात्मा पुरुषोंने नहीं किया है, ये सर्वदा रहनेवाले नहीं हैं— देखते देखते नष्ट होनेवाले हैं, तथा आत्मस्वभावके प्रतिकूल होकर प्राणीको नरकादि दुर्गतियोंमें ले जानेवाले हैं; इसीलिए वे उनमें आसक्त होकर उसी भ्रमरके समान जन्म-मरणादिके अनेक दुखोंको सहते हैं। सो यह कुछ आश्चर्यजनक बात नहीं है, कारण कि व्यसनी जनोंका ऐसा स्वभाव ही होता है— उन्हें कभी अपने हितका विवेक नहीं रहता है॥ ९३॥ प्रथम तो हिताहितका विचार करनेरूप बुद्धिही दुर्लभ है, फिर वह परभवके हितका विवेक तो और भी दुर्लभ है। उस विवेकको प्राप्त करके भी जो जीव प्रमाद करते हैं वे बुद्धिमानोंके लिये सोचनीय होते हैं॥ विशेषार्थ— संसारमें एकेन्द्रियको आदि लेकर चौइन्द्रिय तक सब ही प्राणी मनसे रहित होते हैं, इसीलिये उन्हें

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकाधिपाः क्षितिभुजो भुवि येन जाताः
तस्मिन् विधौ सति हि सर्वजनप्रसिद्धे।
शोच्यं तदेव यदमी स्पृहणीयवीर्या-
स्तेषां बुधाश्च बत किंकरतां प्रयान्ति ॥ ९५ ॥

परिप्राप्तप्रज्ञानामपि उद्भूतवीर्याणां लक्ष्मीविलासाभिलाषेण राज्ञां सेवां कुर्वतामनुशयं कुर्वन्नाह— लोकेत्यादि। क्षितिभुजो राजानः। भुवि। लोकाधिपाः लोकस्वामिनः, लोकाधिका वा पाठः। येन धर्मलक्षणेन विद्धि[धि]ना। स्पृहणीयवीर्याः श्लाघ्यसामर्थ्याः। तेषां क्षितिभुजाम्। बुधाश्च विबुधा अपि। किंकरतां भृत्यताम् ॥ ९५ ॥ पादोपनतोत्तमाङ्गस्य कृष्णराजस्य

विचारात्मक बोध ही नहीं प्राप्त होता है। पंचेन्द्रियोंमें भी सभी जीवोंके मन नहीं होता– कुछके ही होता है। जिनके वह होता है उनको भी प्रायः आत्महितका विवेक नहीं रहता। फिर जो आत्महितका विवेक होनेपर भी तदनुरूप आचरण करनेमें असावधान रहते हैं उनके ऊपर बुद्धिमानोंको खेद होता है। कारण यह कि वे उपयुक्त सामग्रीको प्राप्त करके भी हितके मार्गमें प्रवृत्त नहीं होते और इस प्रकारसे उक्त सामग्रीके विनष्ट हो जानेपर फिर उसका पुनः प्राप्त होना कठिन ही है ।। ९४ ।। जिस विधि (पुण्य) से पृथिवीके ऊपर लोकके अधिपति राजा हुए हैं उस विधिके सर्व जनोंमें प्रसिद्ध होनेपर भी यही खेदकी बात है कि जो विशिष्ट पराक्रमी और विद्वान् हैं वे भी उक्त राजा लोगोंकी दासताको प्राप्त होते हैं– सेवा करते हैं ।। विशेषार्थ— यह सब ही जानते हैं कि राजा, महाराजा, चक्रवर्ती एवं तीर्थंकर आदि जितने भी महापुरुष होते हैं वे सब पूर्वोपार्जित पुण्यके प्रभावसे ही होते हैं। फिर खेदकी बात तो यही है कि अनेक पराक्रमी एवं विद्वान् भी ऐसे हैं जो कि उक्त पुण्यके ऊपर विश्वास न करके लक्ष्मीकी इच्छासे उन राजा आदिकी ही सेवा करते हैं। वे यदि पुण्यके ऊपर विश्वास रखकर उसका उपार्जन करते तो उन्हें राजा आदिकी सेवा न करनेपर भी वह लक्ष्मी स्वयमेव प्राप्त हो जाती। इसके विपरीत पुण्योपार्जनके विना कितनी भी वे राजा आदिकी सेवा क्यों न करें, किन्तु उन्हें वह यथेष्ट लक्ष्मी कभी भी प्राप्त नहीं हो सकती है ।। ९५ ।। जो पर्वत बड़े बड़े वांसोंको धारण करते हैं, जिनका अन्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यस्मिन्नस्ति स भूभृतो धृतमहावंशाः प्रदेशः परः।
प्रज्ञापारमिता धृतोन्नतिधनाः मूर्ध्ना ध्रियन्ते श्रियै।

धृतनिधानस्थानप्रतिपादनव्याजेन धर्मलक्षणविधेः स्वरूपं मार्गं च दर्शयन्नाह— यस्मिन्नित्यादि। सः प्रदेशः परः उत्कृष्टः अस्ति। यस्मिन् प्रदेशे। ध्रियन्ते तिष्ठन्ति। के ते। भूभृतः पर्वताः। कथंभूताः। धृतमहावंशाः धृताः धारिताः पोषिता वा महान्तो वंशा यैः। पुनरपि कथंभूताः प्रज्ञापारमिताः प्रज्ञयैव पारं पर्यन्तम् इतं परिच्छिन्नं येषाम्। पुनरपि किंविशिष्टाः। धृतोन्नतिधनाः धृतम् उन्नतिरेव धनं यैः ते धृतोन्नतिधनाः। केन। मूर्ध्ना शिरसा। किमर्थम्। श्रियै शोभानिमित्तम्। भूयान् महान्। तस्य प्रदेशस्य मार्गः। कथंभूतः। भुजङ्गदुर्गमतमः भुजङ्गैः सर्पैः अतिशयेन दुर्गमः। तथा निराशः आशाभ्यो दिग्भ्यो निःक्रान्तः। यतः एवं ततः व्यक्तं सकललोकविदितं यथा भवत्येवम्। वक्तुम् अयुक्तं महताम्। हे आर्य तद्विषये व्युत्पन्नमते। सर्वार्यसाक्षात्कृतः सर्वार्येण सर्वार्यैकनाम्ना द्वितीयमन्त्रिणा साक्षात्कृतो दृष्टः। अन्यत्र द्वितीयपक्षे— प्रदिश्यते परस्मै प्रतिपाद्यते इति प्रदेशो धर्मः। परः उत्तमः।

बुद्धिसे ही जाना सकता है, तथा जो उंचाईरूप धनको धारण करनेवाले हैं; ऐसे वे पर्वत जिस प्रदेश (निधानस्थान) में शोभाके निमित्त स्थित हैं वह उत्कृष्ट प्रदेश है। उसका लंबा मार्ग सर्पोंसे अत्यन्त दुर्गम और दिशाओंसे रहित अर्थात् दिग्भ्रमको उत्पन्न करनेवाला है। इसीलिये हे आर्य! उसके विषयमें महापुरूषोंके लिए स्पष्ट बतलाना अयोग्य है। वह सर्वार्थ नामके द्वितीय मंत्रीके द्वारा प्रत्यक्षमें देखा गया है। प्रकृत श्लोकका यह एक अर्थ उदाहरण स्वरूप है। दूसरा मुख्य अर्थ उसका इस प्रकार है– प्रदेश शब्दका अर्थ यहां धर्म है, क्योंकि 'प्रदिश्यते परस्मै प्रतिपाद्यते इति प्रदेशः' अर्थात् दूसरोंके लिये जिसका उपदेश किया जाता है वह प्रदेश (धर्म) है, ऐसी उसकी निरुक्ति हैं। जिस धर्मके होनेपर इक्ष्वाकु आदि उत्तम वंशको धारण करनेवाले (कुलीन), बुद्धिके पारगामी (अतिशय विद्वान) तथा गुणोंसे उन्नत होकर धनके धारक ऐसे राजा लोग अन्य जनोंके द्वारा लक्ष्मी प्राप्तिके निमित्त शिरसे धारण किये जाते हैं वह धर्म उत्कृष्ट है। उस धर्मका मार्ग (उपाय) दान-संयमादिके भेदसे अनेक प्रकारका है जो आशा (विषयवांछा) से रहित होता हुआ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूयांस्तस्य भुजङ्गदुर्गमतमो मार्गो निराशस्ततो
व्यक्तं वक्तुमयुक्तमार्यमहतां सर्वार्थसाक्षात्कृतः ॥ ९६ ॥

सः अस्ति यस्मिन् सति । भूभृतो राजानो मूर्ध्ना मस्तकेन ध्रियन्ते लोकैः । किमर्थम् । श्रियै लक्ष्मीनिमित्तम् । कथंभूता भूभृतः । धृतमहावंशाः धृतेक्ष्वाकादिवंशाः । तथा प्रज्ञायाः पारमिताः प्रज्ञायाः पारं पर्यन्तम् इता गताः । धृतोन्नतिधनाः उन्नतिश्च धनं च ते धृते यैः । तस्य धर्मलक्षणप्रदेशस्य । मार्गः उपायः । भूयान् प्रचुरः, दानव्रतादिभेदात् । निराशः आशायाः आकांक्षायाः[1] निःक्रान्तः । भुजङ्गमदुर्गमतमः भुजङ्गानां कामुकानां दुर्गमतमः अगोचरः । यतः एवं ततो व्यक्तं स्फुटं वक्तुम् अयुक्तम् । आर्यमहताम् आर्याणां मध्ये महताम् अस्माकम् । सर्वार्थसाक्षात्कृतः सर्वैः आर्यैः गणधरदेवादिभिः साक्षात्कृतो अनुभूतः । अथवा सर्वैः भव्यैः अर्यते गम्यते सेव्यते इति सर्वार्थः[र्यः] सर्वज्ञः तेन साक्षीकृतः, न पुनः कस्यचिदप्यसौ, प्रतीत्यगोचरः इत्यर्थः ॥ ९६ ॥ शरीरादिभ्यो वैराग्यमुत्पाद्य जैनस्य धर्मं तन्मार्गं च

भुजंगों—कामी जनों—के लिये दुर्लभ है । इस कारण महापुरुषोंके लिये उसका स्पष्टतया व्याख्यान करना अशक्य है । वह धर्म सर्वार्य अर्थात् सबोंसे पूजने योग्य सर्वज्ञके द्वारा प्रत्यक्षमें देखा गया है ।। विशेषार्थ— जिस प्रकार कृष्णराजाका कोष (खजाना) अनेक उन्नत विशाल पर्वतोंसे घिरे हुए एवं सर्पादि हिंस्र जन्तुओंसे व्याप्त दुर्गम स्थानमें निक्षिप्त था और उसके सम्बन्धमें सर्वार्य नामक राजाके द्वितीय मंत्रीको छोड़कर अन्य कोई कुछ भी नहीं जानता था तथा दूसरोंके लिये चोरी आदिके भयसे उसके सम्बन्धमें कुछ बतलाया भी नहीं जा सकता था । उसी प्रकार यह धर्मका स्वरूप भी साधारण जनोंके लिये दुर्गम है । उसको प्रत्यक्ष रूपसे तो सर्वज्ञ ही जानता है तथा उस सर्वज्ञके द्वारा किये गये व्याख्यानसे अन्य गणधर आदि भी यथायोग्य जानते हैं । साधारण मनुष्य अन्य जनोंके लिये उसका स्पष्टतया व्याख्यान नहीं कर सकते हैं, किन्तु विशिष्ट बुद्धिको धारण करनेवाले ही उसका स्पष्ट प्रतिपादन कर सकते हैं । जिन राजा-महाराजा आदिकी अन्य मनुष्य सेवा किया करते हैं वे इसी धर्मके प्रभावसे होते हैं । अतएव जो ऐहिक एवं पारलौकिक सुखकी अभिलाषा करते हैं उन्हें व्रत, संयम, जप-तप एवं दानादिके भेदसे अनेक प्रकारके उस धर्मका आचरण करना चाहिये ॥ ९६ ॥

१ स आशायां आकाक्षायां ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शरीरेऽस्मिन् सर्वाशुचिनि बहुदुःखेऽपि निवसन्
व्यरंसीन्नो नैव प्रथयति जनः प्रीतिमधिकाम्।
इदं' दृष्ट्वाप्यस्माद्विरमयितुमेनं च यतते
यतिर्याताख्यानैः परहितरतिं पश्य महतः ॥ ९७ ॥

प्रदर्शयतो मुनेः न किंचित्फलाभिलाषित्वमस्ति, परोपकारार्थमेव तत्प्रवृत्तेः, 'परोपकाराय सतां हि चेष्टितम्' इति वचनात्। एतदेव दर्शयन्नाह— शरीरेत्यादि। अस्मिन् औदारिके शरीरे। सर्वाशुचिनि सर्वम् अशुचि अपवित्रं यस्मिन्। बहुदुःखे बहूनि शारीर-मानसादीनि दुःखानि यस्मिन्। इत्थंभूतेऽपि काये वसन् जनः। व्यरंसीन्नो वैराग्यं गतवान् नैव। नैवेत्यादि काका व्याख्यानम्— इदं शरीरं दृष्ट्वा जनः प्रीतिम् अधिकां नैव प्रथयति किम्। अपि तु प्रथयत्येव। इमाम् इति पाठे काका व्याख्यानं न कर्तव्यम्। दृष्ट्वा मुनिम्। जनः प्रीतिं प्रमोदम्। अधिकां विशिष्टाम्। प्रथयति करोति। नैव नापि। एनं च जनम्। पुनः यतिः अस्मात् शरीरात्। विरमयितुं निवर्तयितुं यतते प्रयत्नं करोति। कैः कृत्वा। याताख्यानैः ज्ञातसारोपदेशैः ॥ ९७ ॥ कस्मात् न निवर्तते जनः। तं जनं याताख्यानैः मुनिः

जो शरीर सब प्रकारसे अपवित्र और बहुत दुःखोंको उत्पन्न करनेवाला है ऐसे इस शरीरमें रहनेवाला प्राणी उससे विरक्त नहीं होता है, बल्कि वह उक्त शरीरको देख करके भी उससे अधिक प्रीति नहीं करता हो सो बात नहीं, किन्तु अधिक ही प्रीति करता है। उसको हितैषी मुनि श्रेष्ठ उपदेशोंके द्वारा इस अपवित्र शरीरसे विरक्त करनेके लिये प्रयत्न करते हैं। ऐसे महापुरुषोंका दूसरोंके हितविषयक अनुराग देखने योग्य है— प्रशंसनीय है ।। विशेषार्थ— यह शरीर अतिशय अपवित्र एवं तीव्र दुःखोंका कारण है। फिर भी अज्ञानी प्राणी उससे अनुराग करना नहीं छोड़ता है। इतना ही नहीं, बल्कि वह उत्तरोत्तर उसमें अधिक ही आसक्त होता है। यह देखकर दयालु साधु उसे अनेक प्रकारसे समझा करके उससे विरक्त करनेका निरन्तर प्रयत्न करते हैं। दूसरे प्राणियोंके कल्याणमें निरत रहना, यह महात्माओंका स्वभाव ही हुआ करता है। ऐसे साधु पुरुषोंका समागम दुर्लभ है। संसारमें ऐसे निकृष्ट जन ही अधिक देखे जाते हैं जो दूसरोंके साथ मधुर भाषण करके उन्हें धोखा देनेमें उद्यत रहते हैं ॥९७॥

१ मु (जै.) इमां, (नि.) इमं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्थं तथेति बहुना किमुदीरितेन
भूयस्त्वयैव ननु जन्मनि भुक्तमुक्तम् ।
एतावदेव कथितं तव संकलय्य
सर्वापदां पदमिदं जननं जनानाम् ॥ ९८ ॥
अन्तर्वान्तं वदनविवरे क्षुत्तृषार्त्तः प्रतीच्छन्
कर्मायत्तः सुचिरमुदरावस्करे वृद्धगृद्ध्या ।
निष्पन्दात्मा कृमिसहचरो जन्मनि क्लेशभीतो
मन्ये जन्मिन्नपि च मरणात्तन्निमित्ताद्बिभेषि ॥ ९९ ॥

शरीरात् निवर्तयति इत्याह— इत्थं तथेत्यादि । इत्थम् अनेन बहुदुःखत्वप्रकारेण । तथ तेन सर्वाशुचित्वप्रकारेण । उदीरितेन उक्तेन । जन्मनि भुक्तमुक्तं संसारे तद्रूपतया अनुभूतं व्य[त्य]क्तम् । संकलय्य पिण्डितार्थं कृत्वा । जनानाम् । जायते उत्पद्यते प्राणी यस्मिंस्तज्जननं शरीरम् ॥ ९८ ॥ तच्च आददानो गर्भावस्थायां कीदृशः किं कुर्वन्नाददासीदित्याह— अन्तर्वान्तमित्यादि । मात्रा यत् अन्तर्वान्तं छर्दितम् । क्व । वदनविवरे । तत् । उदरावस्करे उदरमेव अवस्करो वर्चोगृहं तत्र स्थितः । वृद्धगृद्ध्या वृहदाकाङ्क्षया । कर्मायत्तः सुचिरं प्रतीच्छन् । कथंभूतः सन् । क्षुत्तृषार्त्तः बुभुक्षापिपासाभ्यां पीडितः । निष्पन्दात्मा संकुचितावयवः । कृमिसहचरः उदरगण्डूपदादिकृमिसहभावी । जन्मनि उत्पत्तौ । क्लेशभीतः समुत्पन्नदुःखात् त्रस्तः । मन्ये हे जन्मिन् अहम् एवं मन्ये । मरणादपि च तन्निमित्तात् जन्मनिमित्ताद्बिभेषि त्वम् ॥ ९९ ॥ सम्यग्दर्शनलाभात्पूर्वभवेषु भवतात्मवधाय सर्वमनुष्ठितमित्याह—

हे भव्य जीव ! यह शरीर ऐसा है और वैसा है, इस प्रकार बहुत कहनेसे क्या प्रयोजन सिद्ध होनेवाला है ? तूने स्वयं ही इस संसारमें उसे अनेक वार भोगा है और छोडा है । संक्षेपमें संग्रहरूपसे तुझे यही उपदेश दिया है कि यह प्राणियोंका शरीर सब दुःखोंका घर है ॥ ९८ ॥ यह प्राणी गर्भावस्थामें कर्मके अधीन होकर चिर काल तक माताके पेटरूप विष्ठागृह (संडास) में स्थित रहता है और वहां भूख-प्याससे पीड़ित होकर बढ़ी हुई तृष्णासे माताके द्वारा खाये हुए भोजन (उच्छिष्ट) की मुंह खोलकर प्रतीक्षा किया करता है । वहां वह स्थानके संकुचित होनेसे हाथ-पैर आदि शरीरके अवयवोंको हिला-डुला नहीं सकता है तथा उदरस्थ कीडोंके साथ रहकर जन्मके कष्टसे भयभीत होता है । हे जन्म लेनेवाले प्राणी ! तू जो मरणसे डरता है सो मैं ऐसा समझता हूं कि वह मरण चूंकि अगले जन्मका कारण है, इसीलिये मानो उस मरणसे डरता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अजाकृपाणीयमनुष्ठितं त्वया विकल्पमुग्धेन भवादितः पुरा।
यदत्र किंचित्सुखरूपमाप्यते तदार्य विद्धयन्धकवर्तकीयम् ॥ १०० ॥

अजाकृपाणीयमित्याह[दि]। अजा च कृपाणश्च तयोरिव कार्यम् अजाकृपाणीयम्– यथा अजा केनचिद्धन्तु नीता, शस्त्रेण च विना सा हन्तुं न शक्यते। तत्र प्रस्तावे अजया पादेन भूमिं खनन्त्या आत्मवधाय खड्ग उत्खातः। तद्वत्त्वया विकल्पविमुग्धेन हेयोपादेयसंकल्पशून्येन आत्मवधाय कार्यमनुष्ठितम्। भवादितः पुरा– इतः सम्यग्दर्शनादिलाभयुक्तात् भवात् पूर्वम्। अत्र संसारे। सुखरूपं सुखस्वभावम्। अन्धकवर्तकीयं अन्धकश्च वर्तका च तयोरिव कार्यं अन्धकवर्तकीयम्– यथा अन्धकेन हस्तं प्रक्षिपता दैवाद्वर्तकी प्राप्यते तथा संसारे चेष्टमानेन जीवेन सुखरूपं स्थितं सुखसंपादकं वस्तु ॥ १०० ॥ सुखाभिलाषिणां च काम एतत्करोती-

है, क्योंकि जन्मका कष्ट तुझे अनुभवमें आ ही चुका है ।। ९९ ।। हे आर्य! तूने इस (सम्यग्दर्शनयुक्त) भवसे पहिले संसारमें हेय और उपादेयके विचारमें मूढ होकर अजाकृपाणीयके समान कार्य किया है। यहां जो कुछ सुखरूप सामग्री प्राप्त होती है वह अन्धक-वर्तकीय न्यायसे ही प्राप्त होती है ।। विशेषार्थ— प्राणीको जब तक सम्यग्दर्शनका लाभ नहीं होता है तब तक उसे अनेक दुख सहने पड़ते हैं। कारण यह है कि सम्यग्दर्शनके विना उसे यह त्याज्य है और यह ग्राह्य है, इस प्रकारका विवेक नहीं हो पाता है। इसीलिये वह ऐसे भी अनेकों कार्योंको स्वयं करता है कि जिनसे मारनेके लिये ले जायी गई बकरीके समान वह अपने आप ही विपत्तिमें पड़ता है। जैसे– कोई एक व्यक्ति मारनेके लिये बकरीको ले गया, किन्तु उसके मारनेके लिये उसके पास कृपाण (तलवार या छुरी) नहीं था। इस बीच उस बकरीने पैरसे जमीनको खोदना प्रारम्भ किया और इससे घातकको वहां भूमिमें खड्ग प्राप्त हो गया जिससे कि उसने उसका वध कर डाला। इसीको 'अजा-कृपाणीय' न्याय कहा जाता है। इसी प्रकार सम्यग्दर्शनके विना यह प्राणी भी अपने लिये ही कष्टकारक उपायोंको करता रहता है। उसे जो अल्प समयके लिये कुछ अभीष्ट सामग्री भी प्राप्त होती है वह ऐसे प्राप्त होती

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हा कष्टमिष्टवनिताभिरकाण्ड एव
चण्डो विखण्डयति पण्डितमानिनोऽपि।
पश्चादद्भुतं तदपि धीरतया सहन्ते
दग्धुं तपोऽग्निभिरमुं न समुत्सहन्ते ॥ १०१ ॥

त्याह— हा कष्टमित्यादि। हा धिक् विषादे वा। कष्टं निन्द्यम्। अकाण्डे अप्रस्तावे। चण्डः कामः विखण्डयति विशेषेण खण्डितव्रतवान् [व्रतान्] करोति। पण्डितमानिनोऽपि पण्डितम् आत्मानं मन्यमानान् अपि। काभिः कृत्वा। इष्टवनिताभिः वल्लभस्त्रीभिः। अमुं कामं न समुत्सहन्ते न समुत्साहं कुर्वन्ति ॥ १०१ ॥ कामं दग्धुं समुत्साहमानाश्च केचित्

है जैसे कि अन्धा मनुष्य कभी हाथोंको फैलाये और उनके बीचमें वटेर पक्षी फंस जाय। ऐसा कदाचित् ही होता है, अथवा प्रायः वह असम्भव ही है। यही अवस्था संसारी प्राणियोंके सुखकी प्राप्तिकी भी है॥१००॥

बड़े खेदकी बात है कि जो अपनेको पण्डित समझते हैं उनको भी यह अतिशय क्रोधी कामदेव (विषयवांछा) असमयमें ही इष्ट स्त्रियोंके द्वारा खण्डित करता है। फिर भी देखो यह आश्चर्यकी बात है कि वे उसे (कामकृत खण्डनको) भी धीरतापूर्वक सहन करते हैं, किन्तु तपरूप अग्निके द्वारा उस कामको जलानेके लिये उत्साहको नहीं करते हैं॥

विशेषार्थ— अभिप्राय यह है कि कामी जन विषयान्ध होकर इच्छापूर्तिके लिये स्त्री आदिकी खोज करते हैं और उन्हें प्राप्त करके वे उनमें इतने आसक्त हो जाते हैं कि फिर उनको अपने हिताहितका विवेक ही नहीं रहता। इस प्रकारसे वे दोनों ही लोकोंको नष्ट करते हैं। यहां इस बातपर खेद प्रगट किया गया है कि विद्वान् मनुष्य भी उस विषयतृष्णाके वशीभूत होकर उसकी पूर्तिके लिये तो असह्य दुखको सहते हैं, किन्तु तप-संयमादिके द्वारा उस विषयतृष्णाको ही नष्ट करनेका अल्प दुख नहीं सहते जो कि वस्तुतः परिणाममें सुखकारक ही है। लोकमें देखा जाता है कि यदि कोई मनुष्य किसी दूसरे मनुष्यका शिरच्छेद करनेके लिये शस्त्रका प्रयोग करता है तो इसके प्रतिकारस्वरूप दूसरा भी उसका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थिभ्यस्तृणवद्विचिन्त्य विषयान् कश्चिच्छ्रियं दत्तवान्
पापां तामवितर्पिणीं विगणयन्नादात् परस्त्यक्तवान्।
प्रागेवाकुशलां विमृश्य सुभगोऽप्यन्यो न पर्यग्रहीत्
एते ते विदितोत्तरोत्तरवराः सर्वोत्तमास्त्यागिनः ॥ १०२ ॥

किंचित्कृतवन्त इत्याह— अर्थिभ्य इत्यादि । पापां पापबहुलाम्। तां श्रियम्। अवितर्पिणीम् अतृप्तिकरीम्। विगणयन् मन्यमानः। अपरा[परो] विवेकी। नादात् न दत्तवान् अर्थिभ्यः। एवमेव त्यक्तवान्। प्रागेव प्रथमत एव। न पर्यग्रहीत् न परिगृहीतवान्। सुभगः सुविवेकी। एते प्रदर्शितस्वरूपास्ते कामदहनोद्यताः। विदितेत्यादि— विदितः उत्तरोत्तरो वरो येषां ते। सर्वोत्तमाः सर्वेभ्यः त्यागिभ्यः उत्कृष्टास्त्यागिनः ॥ १०२ ॥ न च विशिष्टाः संपदः प्राप्य

शिरच्छेद करनेके लिये उद्यत होता है। परन्तु कामीजनकी दशा इससे विपरीत है, क्योंकि काम तो उनका खण्डन करता है— उनके सुखको नष्ट करता है, परन्तु उसका खण्डन करनेके लिये वे स्वयं उद्यत नहीं होते। इतना ही नहीं, किन्तु उस घातकको भी वे अपना मित्र मानकर अनुराग ही करते हैं।। १०१ ।। कोई विद्वान् मनुष्य विषयोंको तृणके समान तुच्छ समझकर लक्ष्मी (धन-सम्पत्ति) को याचकोंके लिये दे देता है; दूसरा कोई विवेकी जीव उक्त लक्ष्मीको पापका कारण और असन्तोषजनक जानकर किसी दूसरेके लिये नहीं देता है, किन्तु उसे यों ही छोड़ देता है। तीसरा कोई महाविवेकी जीव उसको पहिले ही अहितकारक मानकर ग्रहण नहीं करता है। इस प्रकार वे ये त्यागी उत्तरोत्तर त्यागकी उत्कृष्टताके जाननेवाले हैं— उत्तरोत्तर उत्कृष्टताको प्राप्त हैं।। विशेषार्थ— विषयतृष्णाका कारण धन-सम्पत्ति है। कारण यह कि उसके होनेपर वह विषयभोगाकांक्षा और भी अधिक बढ़ती है। इसीलिये विवेकी जन विषयतृष्णाकी मूलभूत उस सम्पत्तिका ही परित्याग करते हैं। प्रकृत श्लोकमें उसका परित्याग करनेवाले तीन प्रकारके बतलाये गये हैं— (१) पहिले प्रकारके त्यागी वे हैं कि जिन्होंने उस लक्ष्मीको तुच्छ समझते हुए दूसरों (पुत्रादि) को दे करके छोड़ा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विरज्य संपदः सन्तस्त्यजन्ति किमिहाद्‌भुतम्।
मा वमीत् किं जुगुप्सावान् सुभुक्तमपि भोजनम् ॥ १०३ ॥

परित्यजतां सतां किंचिदाश्चर्यमस्तीति दर्शयन्नाह— विरज्येत्यादि। विरज्य वैराग्यं गत्वा। मा वमीत् मा छर्दिं करोत्। जुगुप्सावान् विचिकित्सावान् ॥ १०३ ॥ श्रियं त्यजन् कश्चित् किं

है। इन्होंने यद्यपि आत्महितका तो ध्यान रक्खा है, किन्तु जिनके लिये वह दी गई है उनके हितका उन्होंने अनुरागवश ध्यान नहीं रक्खा। (२) दूसरे प्रकारके त्यागी वे हैं कि जिन्होंने उसे पापजनक और तृष्णाको बढ़ानेवाली जानकर स्वयं छोड़ दिया है तथा दूसरोंको भी नहीं दिया है। ऐसे त्यागी अपने समान दूसरोंके भी हितका ध्यान रखनेके कारण पूर्वोक्त त्यागियोंकी अपेक्षा श्रेष्ठ होते हैं। (३) तीसरे प्रकारके त्यागी वे हैं कि जिन्होंने अकल्याणकारी समझकर उसे प्रारम्भमें ही नहीं ग्रहण किया। ऐसे त्यागी सर्वोत्कृष्ट त्यागी माने जाते हैं। इसका कारण यह है कि पूर्वोक्त दोनों प्रकारके त्यागियोंने तो भोगनेके पश्चात् उसे छोड़ा है, किन्तु इन्हें उसके स्वरूपको जानकर ही इतनी विरक्ति हुई कि जिससे उन्होंने उसे स्वीकार ही नहीं किया॥ १०२॥ यदि सज्जन पुरुष विरक्त हो करके उन सम्पत्तियोंको छोड़ देते हैं तो इसमें आश्चर्य ही क्या है? कुछ भी नहीं। ठीक ही है– जिस पुरुषको घृणा उत्पन्न हुई है वह क्या भले प्रकार खाये गये भोजनका भी वमन (उलटी) नहीं करता है? अर्थात् करता ही है॥ विशेषार्थ— किसी व्यक्तिने भोजन तो बड़े आनन्दके साथ किया है, किन्तु यदि पीछे उसे उसमें विषादिकी आशंकासे घृणा उत्पन्न हो गई है तो इससे या तो उसे स्वयं वमन हो जाता है, अन्यथा वह प्रयत्नपूर्वक वमन करके उस भुक्त भोजनको निकाल देता है। इसमें वह कष्टका अनुभव न करके विशेष आनन्द ही मानता है। ठीक इसी प्रकारसे जिन विवेकी जनोंको परिणाममें अहितकारक जानकर उस सम्पत्तिसे घृणा उत्पन्न हो गई है उन्हें

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रियं त्यजन् जडः शोकं विस्मयं सात्त्विकः स ताम् ।
करोति तत्त्वविच्चित्रं न शोकं न च विस्मयम् ॥ १०४ ॥

करोतीत्याह— श्रियमित्यादि। जडः शोकम्— महता कष्टेन मयोपार्जितेयम् एवमेवं कथं त्यक्तेति श्रियं त्यजन् जडः शोकं करोति। स ताम्— स जडः प्रसिद्धो वा। सात्त्विकः अक्लीवः। तां श्रियं त्यजन्। विस्मयं विशिष्टः स्मयो गर्वः विस्मयः तं करोति— अहमेवेत्थंभूतां लक्ष्मीं त्यक्तुं समर्थो नान्यः इति। तत्त्ववित् हेयोपादेयवस्तुस्वरूपपरिज्ञानी ॥ १०४ ॥ यथा च

उसका परित्याग करनेमें किसी प्रकारका क्लेश नहीं होता, प्रत्युत उन्हें इससे अपूर्व आनन्दका ही अनुभव होता है। उसके परित्यागमें कष्ट उन्हींको होता है जो उसे हितकारी मानकर उसमें अतिशय अनुरक्त रहते हैं ॥ १०३ ॥ मूर्ख पुरुष लक्ष्मीको छोड़ता हुआ शोक करता है, तथा पुरुषार्थी मनुष्य उस लक्ष्मीको छोड़ता हुआ विशेष अभिमान करता है, परन्तु तत्त्वका जानकार उसके परित्यागमें न तो शोक करता है और न विशिष्ट अभिमान ही करता है ॥ विशेषार्थ— जो मूर्ख जन पुरुषार्थसे रहित होते हैं उनकी संम्पत्ति यदि दुर्भाग्यसे नष्ट हो जाती है तो वे इससे बहुत दुखी होते हैं। वे पश्चाताप करते हैं कि बड़े परिश्रमसे यह धन कमाया था, वह कैसे नष्ट हो गया, हाय अब उसके विना कैसे जीवन वीतेगा आदि। इसके विपरीत जो पुरुषार्थी मनुष्य होते हैं वे जैसे धनको कमाते हैं वैसे ही उसका दानादिमें सदुपयोग भी करते हैं। इस प्रकारके त्यागमें उन्हें एक प्रकारका स्वाभिमान ही होता है। वे विचार किया करते हैं कि जब मैंने इसे कमाया है तो उसे सत्कार्यमें खर्च भी करना ही चाहिये। इससे वह कुछ कम होनेवाला नहीं है। मैं अपने पुरुषार्थसे फिर भी उसे कमा सकता हूं आदि। यदि कदाचित् वह स्वयं ही नष्ट हो जाता है तो भी अपने पुरुषार्थके बलपर उन्हें इसमें किसी प्रकारका खेद नहीं होता है। परन्तु इन दोनोंके विपरीत जो तत्त्वज्ञानी हैं वे विचार करते हैं कि ये सब धन-सम्पत्ति आदि पर पदार्थ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विमृश्योच्चैर्गर्भात् प्रभृति मृतिपर्यन्तमखिलं
मुधाप्येतत्क्लेशाशुचिभयनिकाराद्यबहुलम्[1]।
बुधैस्त्याज्यं त्यागाद्यदि भवति मुक्तिश्च जडधीः
स कस्त्यक्तुं नालं खलजनसमायोगसदृशम् ॥ १०५ ॥

कुबोधरागादिविचेष्टितैः फलं
त्वयापि भूयो जननादिलक्षणम् ।

श्रीस्त्यज्यते विवेकिभिस्तथा शरीरमपीति दर्शयन्नाह— विमृश्येत्यादि । विमृश्य उच्चैः पर्यालोच्य महाप्रयत्नेन । गर्भात्प्रभृतिमृतिपर्यन्तम् अखिलम् एतत् आचरणं शरीरादिस्वरूपं वा । कथंभूतमित्याह मुधेत्यादि । मुधा एवमेव क्लेशाशुचिभयनिकाराद्यबहुलम् अपि । निकारो वञ्चना पराभवो वा । स कः । स जडधीः । नालं न समर्थः । खलेत्यादि । खलजनानां समायोगो मेलापकः तेन सदृशम् अनेकानर्थकारित्वेन ॥ १०५ ॥ यथा च श्रीः शरीरं च त्याज्यं तथा रागादयोऽपीत्याह— कुबोधेत्यादि । कुत्सितबोधरागादिभिः जनितैः विविधचेष्टितैः । त्वयापि त्वया प्राप्तम् । प्रतीहि पूर्वमुत्तरम् उभयमपि जानीहि । प्रतिलोमवृत्तिभिः कुबोधा-

हैं, ये न मेरे हैं और न मैं इनका स्वामी हूं । कर्मके उदयसे उनका संयोग और वियोग हुआ ही करता है । ऐसा विचार करते हुए उन्हें सम्पत्तिके परित्यागमें न तो शोक होता है और न अभिमान भी ।। १०४ ।। गर्भसे लेकर मरण पर्यन्त यह जो समस्त शरीरसम्बन्धित आचरण है वह व्यर्थमें प्रचुर क्लेश, अपवित्रता, भय और तिरस्कार आदिसे परिपूर्ण हैं; ऐसा जानकर विद्वानोंको उसका परित्याग करना चाहिये । उसके त्यागसे यदि मोक्ष प्राप्त होता है तो फिर वह कौन-सा मूर्ख है जो दुष्ट जनकी संगतिके समान उसे छोड़नेके लिये समर्थ न हो? अर्थात् विवेकी प्राणी उसे छोड़ते ही हैं ।। १०५ ।। हे भव्य! तूने वार वार मिथ्याज्ञान एवं राग-द्वेषादि जनित प्रवृत्तियोंसे जो जन्म-मरणादिरूप फल प्राप्त किया है उसके विरुद्ध प्रवृत्तियों– सम्यग्ज्ञान एवं वैराग्य जनित आचरणों– के द्वारा तू

१ मु (जै., नि.) निकाराद्य° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतीहि भव्य प्रतिलोमवृत्तिभिः
ध्रुवं फलं प्राप्स्यसि तद्विलक्षणम् ॥ १०६ ॥
दयादमत्यागसमाधिसंततेः पथि प्रयाहि प्रगुणं प्रयत्नवान् ।
नयत्यवश्यं वचसामगोचरं विकल्पदूरं परमं किमप्यसौ ॥ १०७ ॥

दिभ्यः प्रतिकूलप्रवर्तिभिः सम्यग्ज्ञानवैराग्यादिभिः। ध्रुवं निश्चयेन नित्यं वा। तद्विलक्षणं जननादिविलक्षणम् ॥ १०६ ॥ इत्थंभूतं च फलमभिलषंस्तस्मिन् मार्गे गच्छेत्याह— दयेत्यादि। दयादमत्यागसमाधीनां संततिः प्रवाहः तस्याः। संबन्धिनि पथि मार्गे। प्रयाहि गच्छ। प्रगुणं मायादिवर्जितं यथा भवति। विकल्पदूरं विकल्पाविषयम्। वचसाम् अगोचरम्। यत् परमम् उत्कृष्टम्। किमपि मोक्षपदम्। असौ पन्थाः ॥ १०७ ॥ विवेक-

निश्चयसे उसके विपरीत फल—अजर-अमर पद—को प्राप्त करेगा, ऐसा निश्चय कर ।। १०६ ।। हे भव्य! तू प्रयत्न करके सरल भावसे दया, इन्द्रिय-दमन, दान और ध्यानकी परम्पराके मार्गमें प्रवृत्त हो जा। वह मार्ग निश्चयसे किसी ऐसे उत्कृष्ट पद (मोक्ष) को प्राप्त कराता है जो वचनसे अनिर्वचनीय एवं समस्त विकल्पोंसे रहित है ।। विशेषार्थ— दीन-दुखी प्राणियोंको देखकर उनके साथ जो हृदयमें सहानुभूतिका भाव उदित होता है वह दया कहलाती है। यह धर्मकी जड़ है, क्योंकि उसके विना धर्म स्थिर रह नहीं सकता। कहा भी है— धर्मो नाम कृपामूलं सा तु जीवानुकम्पनम्। अशरण्यशरण्यत्वमतो धार्मिकलक्षणम् ।। अर्थात् धर्मकी आधारभूत दया है और उसका लक्षण है प्राणियोंके साथ सहानुभूति। इसीलिये जो अरक्षित प्राणियोंकी रक्षा करता है वही धार्मिक माना जाता है ।। क्ष. चू. ५–३५. दूसरे शब्दसे इस दयाको अहिंसा कहा जा सकता है और उस अहिंसामें चूंकि सत्यादिका भी अन्तर्भाव होता है अतएव वह दया पंचव्रतात्मक ठहरती है। दमका अर्थ है राग-द्वेषके दमनपूर्वक इन्द्रियोंका दमन करना— उन्हें अपने नियन्त्रणमें रखना अथवा स्वेच्छाचारमें प्रवृत्त न होने देना। इसे दूसरे शब्दसे संयम भी कहा जा सकता है जो इन्द्रिय-संयम और प्राणिसंयमके भेदसे दो प्रकारका है। त्यागसे अभिप्राय बाह्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विज्ञाननिहतमोहं कुटीप्रवेशो विशुद्धकायमिव।
त्यागः परिग्रहाणामवश्यमजरामरं कुरुते॥ १०८॥
अभुक्त्वापि परित्यागात् स्वोच्छिष्टं विश्वमासितम्।
येन चित्रं नमस्तस्मै कौमारब्रह्मचारिणे॥ १०९॥

